Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

8-5 Digitized by Arya Samaj Foundation Chennai and eGangotri

उमा भारती

समर्पणम्—

तिथी........ पु०सं०........ भारती पुस्तकालय

स्वामी ओमानन्द सरस्वती

श्रीमत्स्वामि-ओमानन्द-सरस्वतीनां महाविदुषां गुरुवर्याणां चरणारविन्देषु लिङ्गानुशासनवृत्तिरियं सश्रद्धं समर्प्यते।

—सुदर्शनदेवाचार्येण

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लिङ्गानुशासनवृत्तिकार:—



पण्डित सुदर्शनदेव-आचार्य:

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृत्तिकारस्य जीवनपरिचयः

लिङ्गानुशासनवृत्तिकारस्य सुदर्शनदेवाचार्यस्य जन्म माघमासे शुक्लपक्षे पञ्चम्यां १९९१ तमे विक्रमाब्दे हरयाणाप्रान्तस्य रोहितकमण्डलान्तर्गते बालन्दनामके ग्रामे महाशयशिवदत्तार्यस्य श्रीमतीरजकादेव्याश्च गृहे समभवत्।

ऋषिभक्तः पिता स्वात्मजमिमं प्राथमिकशिक्षोपरान्तमार्षपाठ-विधिमाश्रित्य वेदादिसच्छास्त्राणामध्ययनार्थं १९४७ तमे ख्रीष्टाब्दे फरवरीमासस्य सप्तमे दिवसे रोहितकमण्डलान्तर्गतं झज्जरगुरुकुल-महाविद्यालयं प्रेषितवान्। तत्रायं पूज्यचरणानां गुरुवर्याणामाचार्य-भगवान्देवमहाभागानां वर्तमान ओमानन्दसरस्वतीनामाचार्यत्वे महावैयाकरणेभ्यः पण्डितविश्वप्रियशास्त्रिप्रभृतिभ्यो विद्वद्भ्यः शिक्षा-कल्प-व्याकरण-निरुक्त-छन्दःशास्त्र-काव्यालंकार-दर्शन-उपनिषद्-गीता-रामायण-मनुस्मृति-संस्कृतसाहित्य-वैदिकवाङ्मयं सम्यगधीतवान्। तदनु च मातृसंस्था-सेवायां झज्जर-गुरुकुलमहाविद्यालयस्य प्रधानाध्यापकपदेऽध्यापनकार्यमारब्धवान्। १९५७ तमे ख्रीष्टाब्दे पञ्चनदविश्वविद्यालयतश्च शास्त्रिपरीक्षा १९६२ तमे ख्रीष्टाब्दे व्याकरणाचार्यपरीक्षा विशेषयोग्यतायामुत्तीर्णा कृता। १९६७ तमे ख्रीष्टाब्दे कांगडीगुरुकुलविश्वविद्यालयस्य संस्कृतसाहित्ये एम० ए० परीक्षायां सर्वप्रथमस्थानमधिगतवान्। पाणिनीयव्याकरणशास्त्रे वैदिकसंकृतसाहित्ये चास्य विदुषः प्रारम्भत एव विशिष्टाभिरुचिरासीत्।

पञ्चनदार्यप्रतिनिधिसभासञ्चालिते यमुनानगर-भटिण्डा-श्रीमद्दयानन्दोपदेशकमहाविद्यालये सप्तवर्षाणि प्रधानाचार्य-पदमलंकृतवान्। साम्प्रतं चरखीदादरीराजकीय-उच्चतरमाध्यमिकविद्यालये

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतप्राध्यापकपदमलंकुरुते। विदुषानेन व्याकरणकारिकाप्रकाश-फिट्सूत्रप्रदीप-ब्रह्मचर्यामृत-वर्णोच्चारणशिक्षाकाशिकावार्तिकप्रदीपिकादयो रचिता ग्रन्थाः पाठकानां चित्तं सम्मोहयन्ति। भवान् प्राचीनसंस्कृत-व्याकरणस्य मर्मज्ञविज्ञो लोकप्रसिद्धलेखकश्च वर्वर्तीति। अधुनात्रभवता भवता पाठकानां सेवायां लिङ्गानुशासनवृत्तिरभिनवा कृतिः प्रस्तूयते। आशासे संस्कृतविद्वत्समाजः पाठकवृन्दारकाश्चास्य विद्वद्वरस्य रचनानां समादरं करिष्यन्तीति।

आचार्यमुद्रणालयः
गोहाना मार्गः (रोहितकम्)
दूरभाषम्—७२८७४

वेदव्रतः शास्त्री
आषाढशुक्ला सप्तमी
२०२८ विक्रमी

सम्मतिः

आचार्य-सुदर्शनदेवविरचितां लिङ्गानुशासनस्य सूत्रवृत्तिं सद्योऽद्यावालूलुकम्। वृत्तिः खलु सूत्रार्थं विशदयति, उदाहरणानि प्रस्तौति, अपेक्षितां च विशेषव्याख्यां विदधाति, शब्दानामर्थमपि प्रकाशयति। अध्येतॄणामध्यापकानां विदुषां च कृते दीपकायिष्यत इयं वृत्तिरिति दृढं विश्वसिमि।

प्रो० महावीरः शास्त्री
शिवाजी महाविद्यालयः,
(दिल्ली विश्वविद्यालयः)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लिङ्गानुशासनविषयकं वक्तव्यम्

महामुनिपाणिनिः

संस्कृतसाहित्ये महामुनिपाणिनिमहाभागस्य पाणिनः, पाणिनिः, दाक्षीपुत्रः, शालङ्किः, शालातुरीयः, आहिक इति षड्नामधेयानि समुपलभ्यन्ते। "पणोऽस्यास्तीति पणिः, तस्यापत्यं पाणिनिः, पाणिनस्यापत्यं युवा पाणिनिः" इति पण्डितहरदत्तस्य व्युत्पत्त्या ज्ञायते यत् पाणिनिवंशस्य प्रवर्तकः पुरुषः 'पाणिन्' इति कश्चिद् बभूव। महाभाष्यकारः पतञ्जलिः "सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः" (१-१-२०) इत्यत्र पाणिनिं दाक्षीपुत्रं लिलेख।

कथासरितसागरे च कथितम्—

अथ कालेन वर्षस्य शिष्यवर्गो महानभूत्।

तत्रैकः पाणिनिर्नामजड़बुद्धितरोऽभवत्।। (१-४-२०)

अनेन कथनेन ज्ञायते यत् पाणिनेराचार्यस्य नाम 'वर्ष' इत्यासीत्। पाणिनिश्चैको मन्दबुद्धिश्छात्रो बभूव।

वैयाकरणसमाजे दन्तकथेयं प्रचलिता वरीवर्ति यद् वर्षाचार्यः पाणिनिं मन्दमतिं छात्रं विलोक्य निजपाठशालातस्तं निष्कासितवान्। पाणिनिश्च तिरस्कारमिमं सोढुं न शशाक। स मेधाबुद्धिलाभाय परमपितरं परमेश्वरं श्रद्धाभक्तिभावेनाराधितवान्। अनेनोपासनेन तस्य प्रज्ञायां परमवैशारद्यं समजनि। तस्यैव परिणामोऽष्टाध्यायीप्रभृतीनि ग्रन्थरत्नानि साम्प्रतं समुल्लसन्ति। पाणिनिमुनिरष्टाध्यायी-प्रभृतिग्रन्थानामन्तेवासिभ्यः प्रवचनञ्चकार। व्याकरणमहाभाष्ये मुनिवरस्यास्यान्तेवासिनामुल्लेखं लभामहे। यथा- 'उभयथा ह्याचार्येण शिष्याः सूत्रं प्रतिपादिताः (१-४-१) "उपसेदिवान् कौत्सः पाणिनिम्" (महा० ३-१-१०८) अत्र महाभाष्ये कौत्सनामकस्य शिष्यवरस्य नामनिर्देशपूर्वकमुल्लेख उपलभ्यते।

मुनिवरस्यास्य षट्सु नामधेयेष्वेकं (शालातुरीय) इति नामधेयमपि विद्यते। गणरत्नमहोदधिकारोऽस्य पदस्येमां व्युत्पत्तिञ्चकार-- "शालातुरो

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri
नाम ग्रामः सोऽभिजनोऽस्यास्तीति शालातुरीयस्तत्रभावन् पाणिनिः" लेखेनानेन ज्ञायते यत्-शालातुरो नाम ग्रामः पाणिनेरभिजन आसीत्। निवासेऽभिजने चायं भेदो यद् यत्र पूर्वजा वसन्ति सोऽभिजन इति कथ्यते। यत्र च साम्प्रतमुष्यते स निवास इत्यभिधीयते। अतः शालातुरः पाणिनिपूर्वजानां ग्राम आसीत्। पुरातत्त्ववेत्तारो वदन्ति यद् अटकनिकटे वर्तमानो लाहुरनामधेयो ग्राम एव प्राचीन शालातुरो बभूव।

मुनिवरोऽयं यत्र स्वशिष्यवृन्दं विद्यामध्यापिपत् तत्र तेषां भोजनावासादीनामपि प्रबन्धमकार्षीत्। महर्षिपतञ्जलिर्व्याकरणमहाभाष्ये प्राह- "ओदनपाणिनीयाः" (१-१-७३) इति। वचनानेन ज्ञायते यत् केचन शिष्यास्तु पाणिनिपाठशालायां विद्यालाभाय प्रविष्टा अभवन्, परमितरे केवलमोदनभोजनायैव मुनिवरस्यास्य शिष्यभावमापेदिरे, ते 'ओदनपाणिनीयाः' इति पदेनाकथ्यन्त। अनेन ज्ञायते यत् पाणिनिमुनिः स्वशिष्यनिवहायौदनभोजनस्य विशिष्टं प्रबन्धमाचचार। एतेन पाणिनिमुनेराढ्यभावोऽभिव्यज्यते।

"सिंहो व्याकरणस्य कुर्तुरहरत् प्राणान् प्रियान् पाणिनेः" इति वचनप्रमाणेन विज्ञायते यत् कश्चित् केसरी पाणिनेः प्राणान् संजहार। महामुनेरस्य स्थितिकालविषये बहुलं मतभेदं लभामहे। 'संस्कृत व्याकरण का इतिहास' इति नामधेये ग्रन्थे पण्डितयुधिष्ठिरमीमांसको लिखति-"हम प्राचीन आर्ष वाङ्मय के अनुशीलन से इस परिणाम पर पहुंचे हैं कि पाणिनि विक्रम से लगभग २८०० वर्ष प्राचीन है।" पण्डितराजमीमांसकमहोदयः पाणिनिमहिमावर्णनमेषु शब्देषु लिखितवान्-

"पाणिनीय शब्दानुशासन का सूक्ष्म पर्यवेक्षण करने से विदित होता है कि पाणिनि न केवल शब्दशास्त्र का ज्ञाता था अपितु समस्त प्राचीन वाङ्मय में उसकी अप्रतिहत गति थी। वैदिक वाङ्मय के अतिरिक्त भूगोल, इतिहास, मुद्राशास्त्र, और लोकव्यवहार आदि का वह अद्वितीय विद्वान् था। उसका शब्दानुशासन न केवल शब्दज्ञान के लिये अपितु प्राचीन भूगोल और इतिहास के ज्ञान के लिये भी एक महान् प्रकाशस्तम्भ है। वह अति प्राचीन और अर्वाचीन काल का

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

जोड़नेवाला महान् सेतु है (व्याकरण शास्त्र का इतिहास प्रथम भाग पृ० १४१)।

मुनिवरोऽयं संस्कृतव्याकरणशास्त्रार्थं शिक्षा-अष्टाध्यायी-धातुपाठ-उणादिकोष-लिङ्गानुशासनषट्कं ग्रन्थरत्नं प्रददौ। परमतिखेदावहमिदं यन्महामुनिरयं स्वजीवनवृत्तान्तविषये न किमपि कुत्रापि लिलेख। विद्वद्भिरुपलब्धसाहित्यमाश्रित्य तद्विषये कानिचित् जीवनतत्त्वानि सन्ति संचितानि कृतानि।

लिङ्गानुशासनम्

लिङ्गानुशासनं व्याकरणशास्त्रस्यैकं महत्त्वपूर्णमङ्गं विद्यते। लिङ्गज्ञानं विना व्याकरणशास्त्रं पंगुरेवेति न सन्देहास्पदम्। अतो व्याकरणशास्त्रप्रवक्तारो लिङ्गानुशासनस्यापि प्रवचनञ्चक्रिरे। पाणिनेः पूर्ववर्तिनौ शान्तनु, व्याडी आचार्यौ लिङ्गानुशासनस्य प्रवचनकारौ बभूवतुः। पाणिनिमुनिरपि स्वशब्दानुशासनसम्बद्धं लिङ्गानुशासनमुपदिदेश। इदं पाणिनीयलिङ्गानुशासनं साम्प्रतं समुपलभ्यते।

श्रीयुतकीथादयः पाश्चात्यविद्वांसः पाणिनिलिङ्गानुशासनं नवीनं साधयितुं व्यायाममकार्षुः परं पण्डितपुंगवः युधिष्ठिरमीमांसको लिखति-"कतिपय पाश्चात्य विद्वानों का यह षड्यन्त्र है कि वे भारतीय प्रामाणिक ग्रन्थों को भी बिना प्रमाण के अप्रामाणिक कहते रहें जिससे भारतीय वाङ्मय की अप्रामाणिकता बद्धमूल हो जाये क्योंकि ये लोग राजनीति के इस तत्त्व को जानते हैं कि एक असत्य बात को भी बराबर कहते रहने पर वह सत्यवत् समझली जाती है। आज भारतीय ऐतिहासिक विद्वान् प्राय ऐसे ही असत्य रूप से प्रतिष्ठापित ऐतिह्य को सत्य समझकर आंख मीचकर प्रमाण मान रहे हैं" (संस्कृत व्याकरण शास्त्र का इतिहास द्वितीय भाग पृ० २२६)।

लिङ्गानुशासनस्य व्याख्याकाराः

श्रीयुतभट्टोत्पलः, श्रीयुतरामचन्द्रः(सं० १४८०), श्रीयुत-भट्टोजिदीक्षितः (सं० १५१०-१५७५), श्रीमन्नारायणभट्टः (सं०

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri
१६७०-१७३३), श्रीमन्नारायणसुधीः (सं० १८००), श्रीयुत-तारानाथतर्कवाचस्पतिश्च (सं० १९३०) एते षड् विद्वांसः पाणिनीयलिङ्गानुशासनस्य संक्षिप्तां व्याख्यामकार्षुः।

लिङ्गानुशासनवृत्तिः

अध्ययनकालत एव पाणिनीयलिङ्गानुशासन-व्याख्या लेखनाभिलाषो मे मानसेऽवर्तत परं नानाविधवाधाजालपरतन्त्रः सन् व्याख्यामिमां प्रस्तौतुं नाशकम्। अस्मिन् वर्षे श्रद्धेयाचार्योमानन्द-सरस्वतीनामतीते भगवान्देवाचार्याणां विशिष्टप्रेरणाप्रदानेन लिङ्गानुशासनवृत्तिमिमां पूर्णां कर्तुमर्होऽभवम्। अहं तत्रभवतां भवतामाचार्यप्रवराणामाशीर्वादमेवेदं मन्ये।

अस्यां लिङ्गानुशासनवृत्तौ सर्वपूर्वं कण्ठाग्रसारल्यचक्षुषा मूलपाठः प्रदत्तः। वृत्तिमध्ये च सूत्र-पदच्छेद-विभक्ति-अनुवृत्ति-अर्थ-उदाहरणानि सन्ति प्रदत्तानि। लिङ्गानुशासनीयशब्दानामर्थोऽपि तत्र प्रकाशितो, यतो हि शब्दज्ञानं विना लिङ्गज्ञानमपार्थकम्। शब्दस्य लिङ्ज्ञानं तत्प्रयोगार्थं भवति, अर्थज्ञानं विना च प्रयोगो न सम्भवति। अन्ते च लिङ्गानुशासने विद्यमानानां शब्दानामकरादिक्रममाश्रित्य पदतालिकैका रचिता, तत्र च पदानां लिङ्गज्ञानाय लिङ्गसंकेतकम-प्युपन्यस्तम्। पकारेण पुलिङ्गस्य, सकारेण स्त्रीलिङ्गस्य, नकारेण च नपुंसकलिङ्गस्य संकेतो वेदितव्यः।

एषा लिङ्गानुशासनवृत्तिरियं विशेषतश्छात्राणामुपयोगार्थं सरलसंस्कृतभाषायां मया लिखिता, परमध्यापकवर्गोऽपि नूनं लाभान्वितो भविष्यति। आशासे संस्कृतव्याकरणशास्त्रमनीषिणः प्रस्तुतां लिङ्गानुशासनवृत्तिं समादरदृशा द्रक्ष्यन्ति, स्वीयां शुभां सम्मतिं समालोचनां च प्रदाय मां कृतकृत्यं करिष्यन्तीति।

विनीतः

सुदर्शदेवाचार्यः,

१० अगस्त १९६२ ई० बालन्दग्रामः, (रोहितकम्)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रास्ताविकम्

अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः।।

व्याकरणं नाम वेदाङ्गेषु प्रधानतममङ्गमिति न तिरोहितं विदुषाम्। सर्वेष्वपि व्याकरणेषु पाणिनीयतन्त्रस्यैव लौकिक--वैदिकोभयप्रक्रियालङ्कृतत्वाद् वेदाङ्गत्वं नेतरेषाम्। तदिदं पाणिनीय-व्याकरणमष्टभिरध्यायैर्गुम्फितत्वादष्टाध्यायीति पदेनापि परिभाष्यते।

स एव पाणिनिमुनिरक्षरसमाम्नायादारभ्य लोकवेदोभयपथा सञ्चरमाणः किमपि व्याकरणान्तरविलक्षणं तन्त्रं प्रणिनाय। यस्मिन् पथि पाणिनेः प्राङ् न कोऽपि आचार्यः सञ्चचार इति हेतोरेव पाणिन्यु--पज्ञं व्याकरणमिति व्यपदेशो लब्धावकाशः। एष एव पाणिनिव्याकरणस्य व्याकरणान्तरेभ्यो विशेषः। व्याकरणं हि नाम प्रकृतिप्रत्ययाद्यनुशासनेन पदपदार्थस्वरूपव्यवस्थापकं पुण्यतमं शास्त्रम्। व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा येनेति तद् व्युत्पत्तेः। पाणिनीयाष्टकमतिरिच्य अन्येऽपि गणपाठ-धातुपाठ- उणादिसूत्र, फिट्सूत्र -शिक्षा - लिङ्गानुशासन-परिभाषाप्रभृतयो ग्रन्थाः पाणिनिना विरचिताः। एतेष्वेव ग्रन्थेष्वन्यतमदस्ति लिङ्गानुशासनं नाम। लिङ्गानुशासनमन्तरा किं वा लिङ्गोपदेशमन्तरा व्याकरणशास्त्रं मन्ये पङ्गु एव वर्वर्ति।

यद्यप्यत्र लिङ्गनिर्धारणविषये शब्दशास्त्रपारंगतेन महामेधाविना पाणिनिना "लुपि युक्तवद् व्यक्तिवचने"[1] 'व्यक्तिवचने' इति लिङ्गसंख्ययोः पूर्वाचार्याणां निर्देशः। "विशेषणानां चाजातेः" "तदशिष्यं संज्ञाप्रमाणत्वात्"[1] इति सूत्रे तद् युक्तवद्भावकथनमशिष्यं शासितुम-शक्यम्।कुतश्चेदिति जिज्ञासायां सूत्र एव प्रतिपादितम्-संज्ञाप्रमाण-त्वात्-लौकिकव्यवहाराधीनत्वादिति संज्ञाशब्दानां लिङ्गं वचनञ्च

१. अष्टा० १–२–५१. ५२. ५३

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्स्वभावसिद्धमेव न यत्नप्रतिपाद्यम्। यथा-आप दाराः गृहाः सिंकताः वर्षा इति। किञ्च एकस्यामपि जलकणिकायां बहुवचनान्तः स्त्रीलिङ्गोऽप्शब्दः प्रयुज्यते, एकस्यामपि योषिति दारशब्दः पुल्लिङ्गो बहुवचनान्तः, गृहशब्दश्चैकस्मिन् वेश्मनि बहुवचनान्तः पुल्लिङ्गश्च, एकस्यामपि बालुकायां बहुवचनान्तः सिकताशब्दः स्त्रीलिङ्गः, वर्षा इति एकस्मिन् विशिष्टकालेऽपि प्रवर्तमानः सत्रीलिङ्गो बहुवचनान्तश्च वर्तते। तस्माद् यथैवेषामप्प्रभृतिशब्दानां स्वाभाविकं लिङ्गं वचनं च तथा पञ्चालादिशब्दानामपीति नार्थो युक्तवद् वचनेनेति सूत्रस्याशयः स्पष्ट एव।

युक्तवद्भावमशिष्यमित्येनमुद्दिश्यैव भगवता वार्तिककारेणापि २.१.३६ इत्यस्मिन् सूत्रे "लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य" लिङ्गविधायकानि सूत्राणि न कर्तव्यानि लोकतः सिद्धत्वात् इत्युक्तम्। मन्ये एतदपि शब्दानां लिङ्गनिर्णयार्थमेव, न तु लिङ्गस्वरूपप्रतिपादनार्थं तत्प्रवृत्तमस्ति। लिङ्गविषये विचारयता महर्षिणा पाणिनिना यद्यपि अशिष्यप्रकरणे "तदशिष्यं संज्ञाप्रमाणत्वात्" पूर्वोक्तानि सूत्राणि प्रदत्तानि। तथापि आचार्येण लिङ्गस्वरूपविषये चतुर्थाध्यायस्य प्रारम्भे एव "ङ्याप्प्रातिपदिकात्" ४.१.१ "स्त्रियाम्" ४. १. ३ इत्यादीनि सूत्राणि पठितानि। उत्तरवर्तिभिः कात्यायनपतञ्जलिप्रभृतिभिराचार्यैः एतेषु लिङ्गस्वरूपनिर्धारणमधिकृत्य विस्तरेण विवेचितमस्ति। तथा हि-"स्त्रियाम्" एतत् सूत्रे भाष्ये "स्त्रियामित्युच्यते, का स्त्री नाम ? लोकत एते शब्दाः प्रसिद्धाः स्त्रीपुमान्नपुंसकमिति। यल्लोके दृष्ट्वा एतदवसीयते- 'इयं स्त्री, 'अयं पुमान्, इदं नपुंसकमिति-सा स्त्री, स पुमान्, तन्नपुसकमिति। किं पुनर्लोके दृष्ट्वैतदवसीयते इयं स्त्री, अयं पुमान् इदं नपुंसकमिति किं पुनस्तत् ? इति प्रश्ने उक्तम्-

स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः।
उभयोरन्तरं यच्च तदभावे नपुंसकम्॥१॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लिङ्गात्स्त्रीपुंसयोर्ज्ञाने , भ्रूकुंसे टाप्प्रसज्यते।
नत्वं खरकुटीः पश्य खट्वावृक्षौ न सिध्यतः।।२।।
नपुंसकं भवेत्तस्मिंस्तदभावे नपुंसकम्।
असत्तु मृगतृष्णावत् गन्धर्वनगरं यथा।।३।।
आदित्यगतिवत् सन्न वस्त्रान्तर्हितवच्च तत्।
तयोस्तु तत्कृतं दृष्ट्वा यथाकाशेन ज्योतिषः।।४।।
अन्योऽन्यसंश्रयं त्वेतत् प्रत्यक्षेण विरुध्यते।
तटे च सर्वलिङ्गानि दृष्ट्वा कोऽध्यवसास्यति।।५।।

इत्येतैः पञ्चभिः श्लोकैर्लौकिकलिङ्गग्रहणे गुणदोषौ प्रादीदृशत्।

यदि हि लिङ्गाल्लोकवत् स्त्रीपुंसयोर्ज्ञानमभीप्स्येत् तदा भ्रूकुंसे टाप् प्रसज्येत। भ्रूकुंसः स्त्रीवेषधारी नटस्तस्य स्तनकेशसम्बन्धात् स्त्रीत्वे सति टाप्स्यात्। खरकुटी नापितगृहमुच्यते इति केचिदाहुः। तत्र मनुष्यस्य वाच्यत्वात्तस्य च लोमशत्वात् पुंस्त्वात् "खरकुटीः पश्ये'--त्यादौ "तस्माच्छसोः नः पुंसि" इत्यनेन नत्वं प्रसज्येत। खट्वावृक्षयोश्च स्त्रीत्वं पुंस्त्वं चाध्यवसातुं न शक्येत, प्रत्युत तयोर्नपुंसकत्वमेव स्यात्। एवञ्च आदित्यगतिवत् सन्न इत्यनेन तु सतोऽपि लिंगस्य तत्र मानं न भवतीति प्रतिपाद्यते। वस्त्रान्तर्हितवच्च तत् एभिरुदाहरणैर्न किञ्चित् साध्यमिति स्फोरयन् भाष्यकारो दृष्टान्तं सान्तं चकार।

तस्माद् वैयाकरणैर्लौकिकं लिङ्गमास्थातुं न शक्यते। अचेतनेऽव्याप्तेर्दारादिषु अतिव्याप्तेश्च संस्त्यानप्रसवौ लिङ्गमित्येव लक्षणं लिङ्गस्य वैयाकरणैः स्वीकृतम्। तथाहि-

संस्त्यानप्रसवौ लिङ्गम् आस्थेयौ स्वकृतान्ततः।
संस्त्याने स्त्यायतेर्ड्ट् स्त्री सूतेः सप्प्रसवे पुमान्।।

अयमर्थः- अधिकरणसाधना लोके स्त्री, स्त्यायत्यस्याङ्गर्भः संघातरूपं प्राप्नोतीत्यर्थः इति। कर्तृसाधनश्च पुमान् सूते पुमानिति। संस्त्यानं तिरोभावः, प्रसव आविर्भावः, साम्यावस्था स्थितिः। एता

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri
अवस्थाः शब्दजन्यप्रतीतिविषया एवेत्यर्थः। यद्यपि सत्त्वरजस्तमोमूलत्वात् पदार्थानां सर्वेषु पदार्थेषु एता व्याप्तास्तथापि केनचिच्छब्देन कस्यचिदेव प्रत्यायनमिति बोध्यम्। भाष्ये तु-

आविर्भावस्तिरोभावः स्थितिश्चेत्यनपायिनः।
धर्मा मूर्तिषु सर्वासु लिङ्गत्वेनानुदर्शिताः।।

अस्यायमाशयः- आविर्भावः= उपचयः, पुंस्त्वम्,तिरोभावः= अपचयः स्त्रीत्वम्, अन्तरात्मावस्था स्थितिर्नपुंसकमित्यर्थः। कस्य पुनराविर्भावादिकं लिङ्गम् ? सत्त्वरजस्तमसां गुणानां तत्परिमाणरूपादीनां च तदात्मकानां शब्दस्पर्शरूपरसगन्धानाम्। शब्दादिसंघातरूपाश्च सर्वा मूर्त्तयः प्रतिक्षणपरिणामस्वभावाश्च सत्त्वादयो गुणा न स्वस्मिन्नात्मनि मुहूर्त्तमपि अवतिष्ठन्ते। एवं शब्दादय आकाशदयो घटादयश्च। उक्तं च-

सर्वमूर्त्यात्मभूतानां शब्दादीनां गुणे गुणे।
त्रयः सत्त्वादिधर्मास्ते सर्वत्र समवस्थिताः।। वा० प० ३-१३

एतत्सर्वं भर्तृहरिणा वाक्यपदीयस्य तृतीयकाण्डे लिङ्गसमुद्देश्य- प्रकरणे विस्तरेण विवेचितमस्ति। नात्र विस्तारभिया तत्सर्वं लिख्यते।

अस्मिन्नेव प्रसङ्गे महाभाष्यस्य चतुर्थाध्यायस्य प्रथमपादस्य तृतीयसूत्रे उद्द्योतकारेण एवमलेखि- सत्त्वादीनामाविर्भावादिरूपः प्रवृत्तिशब्दवाच्यो नित्यः परिणाम इत्यर्थः। पुरुषो यद्यप्यपरिणामी तथापि भोक्तृत्वात् तद्धर्मापन्न इव भवति। तदुक्तं हरिणा-

प्रवृत्तिरिति सामान्यं लक्षणं तस्य कथ्यते।
आविर्भावस्तिरोभावः स्थितिश्चेत्यथ भिद्यते।।

काशिकाकारेणापि 'स्त्रियाम्' ४-१-३ इतिसूत्रे लिङ्गं विवेचितमस्ति। तथाहि 'स्त्रियाम्' इत्युच्यते, केयं स्त्री नाम ? सामान्य-विशेषाः स्त्रीत्वादयो गोत्वादय इव बहुप्रकारा व्यक्तयः। व्यज्यंन्ते

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आभिरिति व्यक्तयः- सामान्यविशेषाणामाश्रयाः। बहुप्रकारा व्यक्तयो येषां सामान्यविशेषाणां ते तथोक्ताः। अनेनैतत् सूचयति विचित्रत्वात् सामान्यविशेषाश्रयाणां व्यञ्जकानां कश्चिदेव सामान्यविशेषः केनचिदेवाश्रयेण व्यज्यते, न सर्वः सर्वेण। प्रतिनियतविषयत्वात् पदार्थशक्तीनाम्। तत्र येनार्थेन स्त्रीत्वमेव व्यज्यते न पुंस्त्वम् नापि नपुंसकत्वम् सा स्त्र्यैव भवति, न पुमान् नापि नपुंसकम्। येन पुंस्त्वमेव व्यज्यते स पुमानेव, येन नपुंसकत्वं तन्नपुंसकमेव। यस्तु द्वयोस्त्रयाणां वा व्यञ्जकः स द्विलिङ्गस्त्रीलिङ्गो वेष्यते, अर्धर्चः, अर्धर्चम्, तटः, तटी, तटमिति। यस्तर्हि सामान्यविशेषस्याश्रयो व्यञ्जको न भवति स कथं तद्योगात् स्त्री भवति ? पुमान् नपुंसकञ्चेति इत्यत उक्तं पुनः काशिकाकृता-"क्वचिदाश्रयविशेषाभावात् उपदेशव्यङ्ग्या एव भवन्ति यथा ब्राह्मणत्वादयः। स्त्रीत्वं च प्रत्ययार्थः, प्रकृत्यर्थविशेषणं चेत्युभयथापि युज्यते-स्त्रियामभिधेयायां स्त्रियां वा यत्प्रातिपदिकं वर्तत इति"।

केषाञ्चिन्मते केवलं विवक्षया लिङ्गव्यवस्था उपपादनीया इति, सा च विवक्षा न हि प्रयोक्तुः किन्तु पृषोदरादिसूत्रोक्तशिष्टव्यवहारानुसारेणैव। तथा चोक्तं भर्तृहरिणा-

सन्निधाने निमित्तानां किञ्चिदेव प्रवर्तकम्।
तथा तक्षादिशब्दानां लिङ्गेषु नियमस्तथा।।१।।
भावतत्त्वविदः शिष्टाः शब्दार्थेषु व्यवस्थिताः।
यद्यद्धर्मेऽङ्गतामेति लिङ्गं तत्तत् प्रचक्षते।। इति।।

अस्यायं भावः- शब्दशक्तिवैचित्र्याद् बहूनां निमित्तानां सद्भावेऽपि किञ्चिदेव लिङ्गविशेषरूपं तत्तदर्थे तत्तच्छब्दप्रयोगनियामकम्। यथा तक्षणच्छेदनादिविविधक्रियासन्निधानेऽपि तक्षणमाश्रित्य तक्षायमिति। तथा च भावतत्त्वविदो नाम ब्रह्मसाक्षात्कारवन्तः शिष्टाः शब्दार्थविषये प्रमाणत्वेन व्यवस्थिताः। एवं च येषां शब्दानां यल्लिङ्गमुपादाय शिष्टाः साधुत्वावगमपूर्वकं प्रयोगं धर्मजनकत्वबुद्ध्या कुर्वन्ति तेषां तदेव

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लिङ्गमिति नियमः सिद्धः।

एवं च कृत्वा शब्दसंस्कारो लिङ्गमिति दर्शन प्रमाणभूतं चकास्ति।

इदमियमयं वेति शब्दसंस्कारमात्रकम्।
निमित्तदर्शनादर्शः कैश्चित् सर्वत्र वर्ण्यते।।

इदं वस्तु, इयं व्यक्तिः, अयमर्थ इति त्रिलिङ्गानां शब्दान सर्वत्र वस्तुमात्रे निमित्तापेक्षा प्रवृत्तिर्न व्याहन्यत इत्यस्मात् निमित्तदर्शनात् शब्दान्वाख्यानमात्रं लिङ्गम् अभ्युपगन्तव्यम्। अत्र कैश्चिदिति वचनाद् ये गुणावस्थारूपं लिङ्गं वस्तूनां विवेकेन परिज्ञातुमशक्तास्तेषामिदं दर्शनम्। विवेककौशले तु यथाप्रविभक्तमेव (गुणावस्थारूपम्) लिङ्गं न्याय्यम्। सिद्धान्तस्तु यथाभाष गुणावस्थारूपं लिङ्गमिति अपरेऽपि सप्तविकल्पाः प्रदर्श्यन्ते-

उपादानविकल्पाश्च लिङ्गानां सप्त वर्णिताः।
विकल्पसन्नियोगाभ्यां ये शब्देषु व्यवस्थिताः।।

उपादानं नाम विशिष्टशक्तिभिः शब्दैरर्थोपाधित्वेन लिङ्गान ग्रहणम्, तस्य भेदा भवन्ति। तत्र विकल्पेन स्त्रीपुन्नपुंसकानां शब्दै प्रत्यायनेन चत्वारो भेदाः-

१. केचित् पुन्नपुंसकविषयाः- शङ्खः, पद्मः, शङ्खम्, पद्मामित्यादयः
२. केचित् स्त्रीनपुंसकनियताः- भागधेयं भागधेयी, भेषजं भेषज अर्चिरित्यादयः।
३. अन्ये स्त्रीपुंससाधारणा इष्वशनितिथ्यादयः।
४ अपरे त्रिलिङ्गाः- तटस्तटी तटमित्यादयः। सन्नियोगे नियमस्तेन त्रयो विकल्पाः-

१. यथा वृक्षादयः पुंस्येव नियताः।
२. खट्वादयः स्त्रियामेव ।
३. दध्यादयो नपुंसके एव इति।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदित्थं लिङ्गविषयकानि नैकानि मतानि संदर्श्य अस्य लिङ्गानुशासनस्य नैके व्यख्यातारः सञ्जज्ञिरे। तथाहि- श्री भट्ट उत्पल-श्री रामचन्द्रः (सं० १४८०) श्री भट्टोजिदीक्षितः (सं० १५१०-१५७५) श्री नारायणभट्टः (सं १६१७-१७३३) श्री नारायणसुधी (सं० १८००) श्री तारानाथः तर्कवाचस्पतिः (सं० १६३०) षडेते विद्वान्सः सन्ति, येषां व्याख्या लभ्यते परं सा संक्षिप्ता। एनं समुद्दिश्यैव श्रीमद्भिः पण्डित-प्रकाण्डैः पण्डितसुदर्शनदेवाचार्य्यमहाशयैर्लिङ्गानुशासनस्य विशदं व्याख्यानमकारि। सर्वादौ मूलपाठः, पश्चात् वृत्तौ सूत्राणि तेषां पदच्छेद-ः, विभक्तिः, अनुवृत्तिः, अर्थाः, उदाहरणानि च सन्दर्शितानि। यावन्तश्शब्दा अत्र समागताः तेषां समेषामर्था अपि उद्घाटिता यतो हि शब्दानामर्थज्ञानमन्तरा केवलं लिङ्गज्ञानमपूर्णमेव। ग्रन्थान्ते अकारादिक्रमेण अनुक्रमणिका अपि पदानां वर्वर्ति। व्याख्यापि प्रयुक्तास्मिन् सन्दर्भेऽतीव मनोहरा प्रौढा, श्लाघनीया नितरां प्राञ्जला सुतरां रञ्जयति मनांसि रसिकानामध्येतृणामिति। एतादृशो ग्रन्थो न केवलं विद्यार्थिनः परं तु प्रौढानां विदुषामप्युपयोगी भविष्यतीत्यत्र नास्ति कोऽपि सन्देहः। अस्याध्यनेन संस्कृतविदुषां छात्राणाञ्च संस्कृत--लिङ्गव्याकरणवाङ्मयान्तरङ्गपरिचयो वाढं भवेदिति विश्वसिमि। कामये चाहमस्य ग्रन्थस्य सर्वाङ्गीणां संफलताम्।

अथापि ग्रन्थास्यास्य प्रकाशने मुद्रण-लिपि-सम्पादन प्रूफसंशोधनादिकर्मणि यदमूल्यं साहाय्यं प्रदत्तं ऐतेभ्योऽपि पण्डितप्रवरवेदव्रतशास्त्रिभ्यो मदीयाः शतशो धन्यवादा विलसन्तुतमामिति। किं बहुना---

विदुषां वशंवदः
आचार्यो हरिदेवः
श्रीमद्दयानन्दवेदविद्यालयः
११६ गौतमनगरम् नवदेहली-४६

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ लिङ्गानुशासनसूत्रपाठः

अथ स्त्रीलिङ्गप्रकरणम्

१. लिङ्गम् ।
२. स्त्री ।
३. ऋकारान्ता मातृदुहितृस्वसृपोतृननान्दरः ।
४. अन्यूप्रत्ययान्तो धातुः ।
५. अशनिभरण्यरणयः पुंसि च ।
६. मिन्यन्तः ।
७. वह्निवृष्ण्यग्नयः पुंसि ।
८. श्रोणियोन्यूर्मयः पुंसि च ।
९. क्तिन्नन्तः ।
१०. ईकारन्तश्च ।
११. ऊङाबन्तश्च ।
१२. य्वन्तमेकाक्षरम् ।
१३. विंशत्यादिरानवतेः ।
१४. दुन्दुभिरक्षेषु ।
१५. नाभिरक्षत्रिये ।
१६. उभावप्यन्यत्र पुंसि ।
१७. तलन्तः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८. भूमिविद्युत्सरिल्लतावनिताभिधानानि ।

१९. यादो नपुंसकम् ।

२०. भास्स्रुक्स्रग्दिगुष्णिगुपानहः ।

२१. स्थूणोर्णे नपुंसके च ।

२२. गृहशशाभ्यां क्लीबे ।

२३. प्रावृड्विप्रुड्रुट्तृड्विट्त्विषः ।

२४. दर्विविदिवेदिखनिशान्यश्रिवेशिकृष्योषधिकट्यङ्गुलयः ।

२५. तिथिनाडिरुचिवीचिनालिधूलिकिकिकेलिच्छवि-
रात्र्यादयः ।

२६. शष्कुलिराजिकुट्यशनिवर्तिभ्रुकुटित्रुटिवलिपङ्क्तयः ।

२७. प्रतिपदापद्विपत्सम्पच्छरत्संसत्परिषदुषःसंवित्क्षुत्पुन्-
मुत्समिधः ।

२८. आशीर्धूःपूर्गीर्द्वारः ।

२९. अप्सुमनस्समासिकतावर्षाणां बहुत्वं च ।

३०. स्रक्त्वग्ज्योग्वाग्यवागूनौस्फिजः ।

३१. तृटिसीमासंबध्याः ।

३२. चुल्लिवेणिखार्यश्च ।

३३. ताराधाराज्योत्स्नादयश्च ।

३४. शलाका स्त्रियां नित्यम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ पुंल्लिङ्गप्रकरणम्

३५. पुमान् ।

३६. घञबन्तः ।

३७. घाऽजन्तश्च ।

३८. भयलिङ्गभगपदानि नपुंसके ।

३९. नङन्तः ।

४०. याच्ञा स्त्रियाम् ।

४१. क्यन्तो घुः ।

४२. इषुधिः स्त्री च ।

४३. देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठ-
खड्गशरपङ्काभिधानानि ।

४४. त्रिविष्टपत्रिभुवने नपुंसके ।

४५. द्यौः स्त्रियाम्

४६. इषुबाहू स्त्रियां च ।

४७. बाणकाण्डौ नपुंसके च ।

४८. नन्तः ।

४९. क्रतुपुरुषकपोलगुल्फमेघाभिधानानि ।

५०. अभ्रं नपुंसकम् ।

५१. उकारान्तः ।

५२. धेनुरज्जुकुहूसरयुतनुरेणुप्रियङ्गवः स्त्रियाम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

५३. समासे रज्जुः पुंसि च ।

५४. श्मश्रुजानुवसुस्वाद्वश्रुजतुत्रपुतालूनि नपुंसके ।

५५. वसु चार्थवाचि ।

५६. मद्गुमधुसीधुशीधुसानुकमण्डलूनि नपुंसके च ।

५७. रुत्वन्तः ।

५८. दारुकशेरुजतुवस्तुमस्तूनि नपुंसके ।

५९. सक्तुर्नपुंसके च ।

६०. प्राग्रश्मेरकारान्तः ।

६१. कोपधः ।

६२. चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि नपुंसके ।

६३. कण्टकाऽनीकसरकमोदकचषकमस्तकपुस्तकतडाक-निष्कशुष्कवर्चस्कपिनाकभाण्डकपिण्डककटकशण्डक-पिटकतालकफलकपुलाकानि नपुंसके च ।

६४. टोपधः ।

६५. किरीटमुकुटललाटवटविटशृंगाटकराटलोष्टानि नपुंसके ।

६६. कुटकूटकपटकवाटकर्पटनटनिकटकीटकटानि नपुंसके च।

६७. णोपधः ।

६८. ऋणलवणपर्णतोरणरणोष्णानि नपुंसके ।

६९. कार्षापणस्वर्णसुवर्णव्रणचरणवृषणविषाणचूर्णतृणानि नपुंसके च ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

७०. थोपधः ।

७१. काष्ठपृष्ठसिक्थोक्थानि नपुंसके ।

७२. काष्ठा दिगर्था स्त्रियाम् ।

७३. तीर्थप्रोथयूथगाथानि नपुंसके च ।

७४. नोपधः

७५. जघनाऽजिनतुहिनकाननवनवृजिनविपिनवेतनशासन-
सोपानमिथुनश्मशानरत्ननिम्नचिह्नानि नपुंसके ।

७६. मानयानाभिधाननलिनपुलिनोद्यानशयनासनस्थान-
चन्दनाऽऽलानसम्मानभवनवसनसम्भावनविभावन-
विमानानि नपुंसके च ।

७७. पोपधः ।

७८. पापरूपोडुपतल्पशिल्पपुष्पशष्पसमीपान्तरीपाणि
नपुंसके

७९. शूर्पकुतपकुणपद्वीपविटपानि नपुंसके च

८०. भोपधः

८१. तलभं नपुंसकम् ।

८२. जृम्भं नपुंसके च ।

८३. मोपधः ।

८४. रुक्मसिध्मयुध्मेध्मगुल्माध्यात्मकुंकुमानि नपुंसके

८५. संग्रामदाडिमकुसुमाश्रमक्षेमक्षौमहोमोद्दामानि
नपुंसके च ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

८६. योपधः

८७. किसलयहृदयेन्द्रियोत्तरीयाणि नपुंसके ।

८८. गोमयकषायमलयान्वयाऽव्ययानि नपुंसके च ।

८९. रोपधः ।

९०. द्वाराग्रस्फारतक्रवक्रवप्रक्षिप्रक्षुद्रनीरतीरदूरकृच्छ्ररन्ध्राश्रश्वभ्रभीरगभीरक्रूरविचित्रकेयूरकेदारोदरांजस्रशरीरकन्दरमन्दारपञ्जराजरजठराऽजिरवैरचामरपुष्करगह्वरकुहरकुटीरकुलीरचत्वरकाश्मीरनीराम्बरशिशिरतन्त्रयन्त्रक्षत्रक्षेत्रमित्रकलत्रचित्रमूत्रसूत्रवक्त्रनेत्रगोत्रांगुलित्रभलत्रशस्त्रशास्त्रवस्त्रपत्रपात्रच्छत्राणि नपुंसके ।

९१. शुक्रमदेवतायाम्

९२. चक्रवज्रान्धकारसाराऽवारपारक्षीरतोमरशृङ्गारभृङ्गारमन्दारोशीरतिमिरशिशिराणि नपुंसके च ।

९३. षोपधः

९४. शिरीषर्जीषाम्बरीषपीयूषपुरीषकिल्विषकल्माषाणि नपुंसके

९५. यूषकरीषमिषविषवर्षाणि नपुंसके च ।

९६. सोपधः ।

९७. पनसबिसबुससाहसानि नपुंसके ।

९८. चमसांसरसनिर्यासोपवासकार्पासवासभासकासकांसमांसानि नपुंसके च ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

९९. कंसं चाप्राणिनि ।
१००. रश्मिदिवसाभिधानानि ।
१०१. दीधितिः स्त्रियाम् ।
१०२. दिनाऽहनी नपुंसके ।
१०३. मानाभिधानानि ।
१०४. द्रोणाढकौ नपुंसके च ।
१०५. खारीमानिके स्त्रियाम् ।
१०६. दाराऽक्षतलाजाऽसूनां बहुत्वं च ।
१०७. नाड्यपजनोपपदानि व्रणाङ्गपदानि ।
१०८. मरुद्गरुदुत्तरदृत्विजः ।
१०९. ऋषिराशिदृतिग्रन्थिक्रिमिध्वनिबलिकौलिमौलिरविकविकपिमुनयः ।
११०. ध्वजगजमुञ्जपुञ्जाः ।
१११. हस्तकुन्ताऽन्तवातव्रातदूतधूर्तसूतचूतमुहूर्ताः ।
११२. षण्डमण्डकरण्डभरण्डवरण्डतुण्डगण्डमुण्डपाषण्डशिखण्डाः ।
११३. वंशांशपुरोडाशाः ।
११४. ह्रदकन्दकुन्दबुद्बुदशब्दाः ।
११५. अर्धपथिमथ्यृभुक्षिस्तम्बनितम्बपूगाः ।
११६. पल्लवपल्वलकफरेफकटाहनिर्व्यूहमठमणितरङ्गतुरङ्गगन्धस्कन्धमृदङ्गसङ्गसमुद्गपुङ्खाः ।
११७. सारथ्यतिथिकुक्षिबस्तिपाण्यञ्जलयः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ नपुंसकप्रकरणम्

११८. नपुंसकम् ।

११९. भावे ल्युडन्तः ।

१२०. निष्ठा च ।

१२१. त्वष्यञौ तद्धितौ ।

१२२. कर्मणि च ब्राह्मणादिगुणवचनेभ्यः ।

१२३. यद्यढग्यगञण्वुञ्छाश्च भावकर्मणि ।

१२४. द्वन्द्वैकत्वम् ।

१२५. अभाषायां हेमन्तशिशिरावहोरात्रे च ।

१२६. अनञ्कर्मधारयस्तत्पुरुषः ।

१२७. अनल्पे छाया ।

१२८. राजाऽमनुष्यपूर्वा सभा ।

१२९. सुरासेनाच्छायाशालानिशाः स्त्रियां च ।

१३०. शिष्टं परवत् ।

१३१. रात्राह्नाहाः पुंसि ।

१३२. अपथपुण्याहे नपुंसके ।

१३३. संख्यापूर्वा रात्रिः ।

१३४. दिगुः स्त्रियां च व्यवस्थया ।

१३५. इसुसन्तः ।

१३६. अर्चिः स्त्रियां च ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१३७. छदिः स्त्रियामेव ।

१३८. मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहल-धनान्नाभिधानानि ।

१३९. सीरार्थौदनाः पुंसि ।

१४०. वक्त्रनेत्राऽरण्यगाण्डीवानि पुंसि च ।

१४१. अटवी स्त्रियाम् ।

१४२. लोपधः ।

१४३. तूलोपलंतालंकुसूलंतरलंकम्बलेदेवलंवृषलाः पुंसि ।

१४४. शीलंमूलंमङ्गलंसालंकमलंतलंमुसलंकुण्डलंपललमृणा-लवालंनिगलंपलालंबिडालंखिलशूलाः पुंसि च ।

१४५. शतादिः संख्या ।

१४६. शताऽयुतप्रयुताः पुंसि च ।

१४७. लक्षाकोटी स्त्रियाम् ।

१४८. शङ्कुः पुंसि च ।

१४९. सहस्रः क्वचित् ।

१५०. मन्द्व्यच्कोऽकर्तरि ।

१५१. ब्रह्मन् पुंसि च ।

१५२. नामरोमणी नपुंसके ।

१५३. असन्तो द्व्यच्कः ।

१५४. अप्सराः स्त्रियाम् ।

१५५. त्रान्तः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१५६. यात्रामात्राभस्त्रादंष्ट्रावरत्राः स्त्रियामेव ।

१५७. भृत्राऽमित्रच्छात्रपुत्रमन्त्रवृत्रमेढ्रोष्ट्राः पुंसि ।

१५८. पत्रपात्रपवित्रसूत्रच्छत्राः पुंसि च ।

१५९. बलकुसुमशुल्बपत्तनरणाभिधानानि ।

१६०. पद्मकमलोत्पलानि पुंसि च ।

१६१. आहवसंग्रामौ पुंसि ।

१६२. आजिः स्त्रियामेव ।

१६३. फलजातिः ।

१६४. वृक्षजातिः स्त्रियामेव ।

१६५. वियज्जगत्सकृत्शकन्पृषत्शकृद्यकृदुदश्वितः ।

१६६. नवनीतावतानृतामृतनिमित्तवित्तचित्तपित्तव्रत-
रजतवृत्तपलितानि ।

१६७. श्राद्धकुलिशदैवपीठकुण्डभाण्डाङ्काङ्गदधिसक्थ्यक्ष्या-
स्यास्पदाकाशकण्वबीजानि ।

१६८. दैवं पुंसि च ।

१६९. धान्याज्यसस्यरूप्यकुप्यपण्यवर्ण्यधिष्ण्यहव्यकव्यका-
व्यसत्यापत्यामूल्यशिक्यकुड्यमद्यहर्म्यतूर्यसैन्यानि ।

१७०. द्वन्द्वबर्हदुःखबडिशपिच्छबिम्बकुटुम्बकवचवरशर-
वृन्दारकाणि ।

१७१. अक्षमिन्द्रिये ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ स्त्रीपुंसप्रकरणम्

१७२. स्त्रीपुंसयोः ।

१७३. गोमणियष्टिमुष्टिपाटलिवस्तिशाल्मलित्रुटिमसिमरीचयः ।

१७४. मृत्युसीधुकर्कन्धुकिष्कुकण्डुरेणवः ।

१७५. गुणवचनमुकारान्तं नपुंसकं च ।

१७६. अपत्यार्थस्तद्धिते ।

अथ पुंनपुंसकप्रकरणम्

१७७. पुंनपुंसकयोः ।

१७८. घृतभूतमुस्तक्ष्वेलितैरावतपुस्तकबुस्तलोहिताः ।

१७९. शृङ्गार्धनिदाघोद्यमशल्यदृढाः ।

१८०. व्रजकुञ्जकुथकूर्चप्रस्थदर्पाभार्धर्चदर्भपुच्छाः ।

१८१. कबन्धौषधायुधान्ताः ।

१८२. दण्डमण्डखण्डशैवसैन्धवपार्श्वाकाशकुशकाशाङ्कुशकुलिशाः ।

१८३. गृहमेहदेहपट्टपटहाष्टापदाम्बुदकाकुदाश्च ।

अथ अविशिष्टलिङ्गप्रकरणम्

१८४. अविशिष्टलिङ्गम् ।

१८५. अव्ययं कतियुष्मदस्मदः । १८६. ष्णान्ता संख्या ।

१८७. गुणवचनं च । १८८. कृत्याश्च ।

१८९. करणाधिकरणयोर्ल्युट् । १९०. सर्वादीनि सर्वनामानि ।

इति लिङ्गानुशासनसूत्रपाठः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ लिंगानुशासनभाष्यम्

ओ३म् विश्वानि देव सवितर्दुरितानि परासुव ।
यद्भद्रं तन्न आ सुव ॥ यजु० ॥

[अथ स्त्रीलिङ्गप्रकरणम्]

१-लिङ्गम् ॥१॥

लिङ्गम् १।१॥ लिङ्गमित्यधिकारोऽयम् ।

२—स्त्री ॥२॥

स्त्री १।१॥ इत उत्तरं वक्ष्यमाणाः शब्दाः स्त्रियां भवन्तीत्यधिकारोऽयम् ॥

३-ऋकारान्ता मातृदुहितृपोतृस्वसृननान्दरः ॥३॥

ऋकारान्ताः १।३ मातृ-दुहितृ-पोतृ-स्वसृ-ननान्दरः १।३॥ मातृ-दुहितृ-पोतृ-स्वसृ-ननान्दर एते पंच ऋकारान्ताः शब्दाः स्त्रियां भवन्ति। इयं माता। इयं दुहिता। इयं पोता। इयं स्वसा। इयं ननान्दा ॥ माता=जननी। दुहिता=पुत्री। पोता=पावयित्री। स्वसा=भगिनी। ननान्दा=पतिभगिनी ॥

४-अन्यूप्रत्ययान्तो धातुः ॥४॥

अनि-ऊ-प्रत्ययान्तः १।१ धातुः १।१॥ अनिप्रत्ययान्त ऊप्रत्ययान्तश्च धातुजः शब्दः स्त्रियां भवति। अनिप्रत्ययान्तो यथा—अवनिः। सरणिः। रजनिः। इत्यादि। ऊप्रत्ययान्तो यथा—चमूः। वधूः। इत्यादि ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अवन्यादिषु 'अर्तिसृधृधम्यम्यश्यवितृभ्योऽनिः' (उ० २।१०३) इति अनि-प्रत्ययः। अव+अनि+सु=अवनिः। सृ+अनि+सु=सरणिः॥

चमू—आदिषु 'कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः स्त्रियाम्' (उणा० १।८०) इति ऊ-प्रत्ययः। चम्+ऊ+सु=चमूः।

अवनिः=पृथिवी। सरणिः=मार्गः। रजनिः=रात्रिः। चमूः=सेना। वधू=नवोढा स्त्री॥

अरणिः सरणिः। धरणिः। धमनिः। अमनिः। अशनिः। अवनिः। तरणिः। आशुशुक्षणिः। धर्षणिः। अद्मनिः। वर्त्तनिः। क्षिपणिः। इत्येतेऽनिप्रत्ययान्ता उणादौ (२।१०३-१०८) प्रतिपादिताः॥ कर्षूः। चमूः। तनूः। धनूः। सर्जूः। खर्जूः। मर्जूः। खड्डूः। खडूः वधूः। कच्छूः। काशूः। पादूः। आरूः। आडूः। अलाबूः। कशेरूः। तर्दूः। दर्द्रूः। नृतूः। गृधूः। रतूः इत्येते ऊ-प्रत्ययान्ता उणादौ (१।८०-९२) प्रतिपादिता इमे यथायथं तत एवावगन्तव्याः॥

५—अशनिभरण्यरणयः पुंसि च ॥५॥

अशनि-भरणि-अरणयः १।३ पुंसि ७।१ च अ०॥ अनिप्रत्ययान्तत्वात्पूर्वेण स्त्रीत्वे प्राप्ते पुंस्त्वं पक्षे विधीयते। अशनि-भरणि-अरणयः शब्दाः पुंसि स्त्रियां च भवन्ति। इयम् अशनिः। अयम् अशनिः। इयं भरणिः। अयं भरणिः। इयम् अरणिः। अयम् अरणिः॥

अशन्यादिषु 'अर्तिसृधम्यम्यश्यवितृभ्योऽनिः' (उणा० २।१०३) इति अनि-प्रत्ययः। अश्+अनि+सु=अशनिः। ऋ+अनि+सु=अरणिः। भृ+अनि+सु=भरणिः॥

अशनिः=वज्रम्। भरणिः=नक्षत्राभिधानम्। अरणिः=अग्न्युत्पत्तये मथनी, द्वे दारुणी वा॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

६--मिन्यन्तः ॥ ६ ॥

मि-नि-अन्तः ।१।१॥ धातुरित्यनुवर्त्तते । मिप्रत्ययान्तो नि-प्रत्ययान्तश्च धातुजः शब्दः स्त्रियां भवति । मिप्रत्ययान्तो यथा—भूमिः । निप्रत्ययान्तो यथा—ग्लानिः । हानिः । धुनिः । इत्यादि ॥

भूमिरित्यत्र 'भुवः कित्' (उणा० ४।४५) इति मि-प्रत्ययः । भू+मि+सु=भूमिः । ग्लानि-आदिषु च 'वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्' (उणा० ४।५१) इति निप्रत्ययः ॥

नेमिः । ऊर्मिः । भूमिः । रश्मिः । दल्मिः । यामिः । जामिः । इति उणादौ (४।४३-४७) मिप्रत्ययान्ताः प्रतिपादिताः ॥ वेणिः । ज्यानिः । जूर्णिः । क्षोणिः । श्रेणिः । सृणिः । वृष्णिः । अग्निः । वह्निः । श्रेणिः । श्रोणिः । योनिः । द्रोणिः । ग्लानिः । हानिः । तूर्णिः । शिनिः । म्लानिः । घृणिः । पृश्निः । पार्ष्णिः । चूर्णिः । भूर्णिः । घूर्णिः । इति उणादौ (४।४८-५२) निप्रत्ययान्ताः प्रतिपादिताः । इमे यथायथं तत एवावगन्तव्याः ॥

७—वह्निवृष्ण्यग्नयः पुंसि ॥ ७ ॥

वह्नि-वृष्णि-अग्नयः १।३ पुंसि ७।१॥ निप्रत्ययान्तत्वात्पूर्वेण स्त्रीत्वे प्राप्ते पुंस्त्वं विधीयते । वह्नि-वृष्णि-अग्नयः शब्दा निप्रत्ययान्ता अपि पुंसि भवन्ति । अयं वह्निः । अयं वृष्णिः । अयम् अग्निः ।

वह्निः=अग्निः । वृष्णिः=क्षत्रियो वैश्यो वा । अग्निः=वह्निः ॥

८—श्रोणियोन्यूर्मयः पुंसि च ॥ ८ ॥

श्रोणि-योनि-ऊर्मयः १।३ पुंसि ७।१ च अ० ॥ श्रोणि-योनि-ऊर्मयः शब्दाः पुंसि स्त्रियां च भवन्ति । श्रोण्यादीनां मिप्रत्ययान्तत्वान्निप्रत्ययान्तत्वाच्च मिन्यन्तः (६) इति स्त्रीत्वे प्राप्ते पुंस्त्वं विधीयते । अयं श्रोणिः । इयं श्रोणिः । अयं योनिः । इयं योनिः । अयम् ऊर्मिः । इयम् ऊर्मिः । स्त्रीत्वपक्षे वा ङीबपि भवति—श्रोणी । योनी । ऊर्मी इति ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रोणिः=कटिप्रदेशः। योनिः=कारणमुपस्थेन्द्रियं वा। ऊर्मिः=जलतरङ्गः॥

९—क्तिन्नन्तः॥ ९॥

क्तिन् अन्तः १।१॥ धातुरित्यनुवर्त्तते। क्तिन्-प्रत्ययान्तो धातुजः शब्दः स्त्रियां भवति। तद्यथा—कृतिः। बुद्धिः। दृष्टिः॥

कृति-आदिषु 'स्त्रियां क्तिन्' (३।३।९४) इति क्तिन् प्रत्ययः। कृ+क्तिन्+सु=कृतिः। बुध्+क्तिन्+सु=बुद्धिः। दृश्+क्तिन्+सु=दृष्टिः। कृदिकारादक्तिनः (४।१।४५) इत्यत्र अक्तिन इति निर्देशात् पक्षे ङीप्-प्रत्ययो न भवति।

१०—ईकारान्तश्च॥ १०॥

ईकारान्तः १।१ च अ०॥ ई-प्रत्ययान्तश्च धातुजः शब्दः स्त्रियां भवति। अत्र चकारो धात्वधिकारनिवृत्त्यर्थः। उदाहरणं यथा—अवीः। तन्त्रीः। तरीः। लक्ष्मीः।

अवी-आदिषु 'अवितॄस्तॄतन्त्रिभ्य ईः' (उणा० ३।१५८) इति ई-प्रत्ययः। अव्+ई+सु=अवीः। तन्त्र+ई+सु=तन्त्रीः। तॄ+ई+सु=तरीः। लक्ष्मीरित्यत्र 'लक्षेर्मुट् च' (उ० ३।१६०) इति ई-प्रत्ययः। लक्ष्+मुट्+ई+सु=लक्ष्मीः॥

अवीः=रजस्वला स्त्री। तन्त्रीः=वीणा। तरीः=नौका। लक्ष्मीः=विभूतिः॥

अवीः। तरीः। स्तरीः। तन्त्रीः। ययीः (अश्वः)। पपीः (सूर्यश्चन्द्रो वा)। लक्ष्मीः। एते शब्दा उणादौ (३।१५८-१६०) ई-प्रत्ययान्ताः प्रतिपादिता यथायथं तत एवावगन्तव्याः॥

११—ऊङ्ङ्याबन्तश्च॥ ११॥

ऊङ्-ङी-आबन्तः १।१ च अ० प०॥ ङी इत्यनेन ङीप्-ङीष्-ङीनां सामान्येन ग्रहणम्। ऊङ्-प्रत्ययान्तो ङी-प्रत्ययान्त आप्-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्ययान्तश्च शब्दः स्त्रियां भवति । ऊङ्प्रत्ययान्तो यथा कुरूः । कर्कन्धू । इत्यादि ।। ङीप् प्रत्ययान्तो यथा—कर्त्री । हर्त्री । योगिनी । ब्रह्मचारिणी । इत्यादि ।। ङीष्–प्रत्ययान्तो यथा– नर्त्तकी । खनकी । रजकी । गौरी । इत्यादि ।। ङीन्–प्रत्ययान्तो यथा—शार्ङ्गरवी । कापटवी । बैदी । और्वी । इत्यादि ।। टाप्–प्रत्ययान्तो यथा—अजा । एडका । कोकिला । चटका । इत्यादि ।। डाप्–प्रत्यान्तो यथा– पामा । सीमा । बहुराजा । बहुतक्षा । इत्यादि ।। चाप्–प्रत्ययान्तो यथा—आम्बष्ठ्या । सौवीर्या । कारीषगन्ध्या । वाराह्या । आवट्या । इत्यादि ।।

ऊङ्—ङीप्—ङीष्—ङीन्—टाप्—डाप्—चाप् प्रत्यया अष्टाध्याय्याश्चतुर्थाध्यायस्य प्रथमपादस्य प्रारम्भे समुपदिष्टा इमे तत एत्र यथास्वं प्रतिपत्तव्याः ।।

१२–य्वन्तमेकाक्षरम् ।। १२ ।।

य्वन्तम् १।१ एकाक्षरम् १।१।। ई च ऊ चेति यू, यू अन्ते यस्य तद् य्वन्तम् एकाक्षरमीकारान्तमूकारान्त च शब्दरूपं स्त्रियां भवति ईकारान्तं यथा—श्रीः । इत्यादि ।। ऊकारान्तं यथा— भूः । इत्यादि ।। एकाक्षरमिति किम् ? पृथुश्रीः । प्राप्तभूः । इत्यत्र बहुव्रीहौ विशेष्यलिङ्ग एव भवति ।

१३–विंशत्यादिरानवतेः ।। १३ ।।

विंशति-आदेः ५।१ आ अ० प० नवतेः ५।१।। विंशतिप्रभृति नवतिपर्यन्त संख्यावाचकाः शब्दाः स्त्रियां भवन्ति । इयं विंशतिः । इयं त्रिंशत् । इयं चत्वारिंशत् । इयं पञ्चाशत् । इयं षष्टिः । इयं सप्ततिः । इयमशीतिः । इयं नवतिः । विंशत्यादेरिति किम् ? एकादशादेर्विशेष्यलिङ्गत्वं बोध्यम्—एकादश रुद्राः । एकादश कन्याः । एकादश फलानि । आनवतेरिति किम् ? शतम् । सहस्रम् ।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१४–दुन्दुभिरक्षेषु ॥ १४ ॥

दुन्दुभिः १।१ अक्षेषु ७।१॥ अक्षार्थे दुन्दुभिशब्दः स्त्रियां भवति। इयं दुन्दुभिः। पक्षेऽत्र ङीबपि भवति—दुन्दुभी। अक्षादन्यत्र तु दुन्दुभिशब्दः पुंसि ज्ञेयः—अयं दुन्दुभिः, असुरो वाद्यविशेषो वा। "स्याद् भेर्यां दुन्दुभिः पुंसि, स्यादक्षे दुन्दुभिः स्त्रियाम्" इत्यमरः॥

१५–नाभिरक्षत्रिये ॥ १५ ॥

नाभिः १।१ अक्षत्रिये ७।१॥ क्षत्रियार्थभिन्नो नाभिशब्दः स्त्रियां भवति। इयं नाभिः, पुरुषावयव इत्यर्थः। अक्षत्रिय इति किम्? अयं नाभिः, क्षत्रिय इत्यर्थः॥

१६–उभावन्यत्र पुंसि ॥ १६ ॥

उभौ १।२ अन्यत्र अ० प० पुंसि ७।१॥ उभौ नाभि-दुन्दुभिशब्दावक्षत्रियार्थादक्षार्थाच्चान्यत्र पुंसि भवतः। अयं नाभिः, क्षत्रिय इत्यर्थः। अयं दुन्दुभिः, भेरीत्यर्थः। यशः, पटहः, ढक्का, भेरी, दुन्दुभिरिति पर्यायाः।

यदत्रोक्त तस्य क्वचिद् व्यभिचारोऽपि लक्ष्यते। यथा—'समुल्लसत्पङ्कजपत्रकोमलैरुपहितश्रीण्युपनीविनाभिभिः' इति भारविः अत्र नाभिभिरित्यस्य कोमलैरित्यस्य विशेषणाच्छरीरावयववाचकस्यापि नाभिशब्दस्य पुंस्त्वं स्पष्टम्। अत एव रभसोऽपि प्राह—

मुख्यराट्-क्षत्रिये नाभिः पुंसि प्राण्यङ्गके द्वयोः।
चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामदे॥

१७–तलन्तः ॥ १७ ॥

तलन्तः १।१॥ तल् अन्ते यस्य स तलन्तः। तल्-प्रत्ययान्तः शब्दः स्त्रियां भवति। शुक्लस्य भावः शुक्लता। जडस्य भावः जडता। ब्राह्मणस्य कर्म ब्राह्मणता। जनानां समूहो जनता। देव एव देवता। इत्यादि॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुक्लता, ब्राह्मणता इत्यत्र 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' (५।१।१२४) इति भावे कर्मणि च तल्-प्रत्ययः। शुक्ल+तल्। शुक्ल+त+टाप्+सु=शुक्लता। एवं ब्राह्मणता। प्रकृतयोगेन तल्-प्रत्ययान्तस्य शब्दस्य स्त्रियामनुशासनात् 'अजाद्यतष्टाप्' (४।१।४) इति स्त्रियां टाप्-प्रत्ययः।

जनता इत्यत्र 'ग्रामजनबन्धुसहायेभ्यस्तल्' (४।२।४३) इति समूहार्थे तल् प्रत्ययः। देवता इत्यत्र च 'देवात्तल्' (५।४।२७) इति स्वार्थे तल्-प्रत्ययः॥

१८—भूमिविद्युत्सरिल्लतावनिताभिधानानि ॥१८॥

भूमि-विद्युत्-सरित्-लता-वनिताभिधानानि १।३॥ अभिधानानि पर्यायवाचकानीत्यर्थः। भूमि-विद्युत्-सरित्-लता-वनितानां पर्यायवाचकाः शब्दाः स्त्रियां भवन्ति। भूमिः, भूः। विद्युत्, सौदामिनी। सरित्, निम्नगा। लता, वल्ली। वनिता, योषित्॥

१—अथ भूमि-अभिधानानि—भूः। भूमिः। अचला। अनन्ता। रसा। विश्वम्भरा। स्थिरा। धरा। धरित्री। धरणिः। क्षोणिः। ज्या। काश्यपी। क्षितिः सर्वंसहा। वसुमती। वसुधा। उर्वी। वसुन्धरा। गोत्रा। कुः। पृथिवी। पृथ्वी। क्ष्मा। अवनिः। मेदिनी। मही॥

२—अथ विद्युदभिधानानि—तडित्। सौदामिनी। विद्युत्। चंचला। चपला॥

३—अथ सरिदभिधानानि— नदी। सरित्। तरङ्गिणी शैवलिनी। तटिनी। ह्लादिनी। धुनी। स्रोतस्वती। द्वीपवती। स्रवन्ती। निम्नगा। अपगा॥

४—अथ लताभिधानानि—लता। वल्ली। वल्लरी। व्रततिः॥

५—अथ वनिताभिधानानि—स्त्री। योषिद्। अबला। योषा।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नारी। सीमन्तिनी। वधूः। प्रतीपदर्शिनी। वामा। वनिता। महिला। अङ्गना। भीरुः। कामिनी। वामलोचना। प्रमदा। मानिनी। कान्ता। ललना। नितम्बिनी। सुन्दरी। रमणी। रामा। कोपना। भामिनी। वरारोहा। मत्तकाशिनी। उत्तमा। वरवर्णिनी।

१९—यादो नपुंसकम् ॥ १९ ॥

यादः १।१ नपुंसकम् १।१॥ पूर्वस्यायमपवादः। सरिद्-वाचको यादःशब्दो नपुंसके भवति। इदं यादः सरिदित्यर्थः॥ यादः। यादसी। यादांसि इत्यादि रूपनिरूपणं कार्यम्॥

२०—भास्स्रुक्स्रग्दिगुष्णिगुपानहः ॥ २० ॥

भास्-स्रुक्-स्रक्-दिक्-उष्णिक्-उपानहः १।३॥ भास्-स्रुक्-स्रक्-दिक्-उष्णिक्-उपानद् एते षट् शब्दाः स्त्रियां भवन्ति। इयं भाः। इयं स्रुक्। इयं स्रक्। इयं दिक्। इयम् उष्णिक्। इयम् उपानत्॥

भाः=दीप्तिः। स्रुक्=स्रुवः, यज्ञपात्रविशेषः। स्रक्=माला। दिक्=दिशा। उष्णिक्=छन्दोभिधानम्। उपानत्=पादत्राणम्॥

२१—स्थूणोर्णे नपुंसके च ॥ २१ ॥

स्थूणोर्णे १।२ नपुंसके ७।१ च अ०॥ स्थूणा शब्द ऊर्णा शब्दश्च स्त्रियां नपुंसके च भवतः। इयं स्थूणा। इदं स्थूणम्। इयमूर्णा। इदमूर्णम्॥

स्थूणा=गृहस्तम्भः। ऊर्णा=मेषादिलोम॥

२२—गृहशशाभ्यां क्लीबे ॥ २२ ॥

गृह-शशाभ्याम् ५।२ क्लीबे ७।१॥ क्लीबशब्दो नपुंसकपर्यायः। स्थूणोर्णे इत्यनुवर्तते। यथासंख्यं गृह-शशाभ्यां शब्दाभ्यां परौ स्थूणा-ऊर्णाशब्दौ क्लीबे=नपुंसके भवतः। गृहस्य स्थूणेति गृह-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थूरणम् । शशस्य ऊर्णेति शशोर्णम् । 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः (२।४।२६) इति परवल्लिङ्गतापवादः ॥

२३–प्रावृड्विप्रुड्रुड्तृड्विट्त्विषः ॥ २३ ।

प्रावृट्-विप्रुट्-रुट्-तृट्-विट्-त्विषः १।३॥ प्रावृट-विप्रुट्-रुट् तृट्-विट्-त्विट् एते षट् शब्दाः स्त्रियां भवन्ति । इयं प्रावृट् । इयं विप्रुट् । इयं रुट् । इयं तृट् । इयं विट् । इयं त्विट् ॥

प्रावृट्=वर्षा । विप्रुट्=बिन्दुः । रुट्=क्रोधः । तृट्=तृषा । विट्=विष्ठा, कन्या वा । त्विट्=प्रभा ॥

२४–दर्विविदिवेदिखनिशान्यश्रिवेशिकृष्योषधि-कट्यङ्गुलयः ॥ २४ ॥

दर्वि–विदि–वेदि–खनि–शानि–अश्रि–वेशि–कृषि-ओषधि-कटि-अङ्गुलयः १।३॥ दर्वि–विदि–वेदि–खनि–शानि–अश्रि–वेशि–कृषि–ओषधि-कटि-अङ्गुलि एत एकादश शब्दाः स्त्रियां भवन्ति । इयं दर्विः । इयं विदिः । इयं वेदिः । इयं खनिः । इयं शानिः । इयमश्रिः । इयं वेशिः । इयं कृषिः । इयमोषधिः । इयं कटिः । इयमङ्गुलिः ॥ पक्षे सर्वत्र ङीबपि भवति—दर्वी । विदी । वेदी । खनी । शानी । अश्री । वेशी । कृषी । ओषधी । कटी । अङ्गुली । तथा चाह कविः कालिदासः—अङ्गुलीवोरगक्षता । दर्वीकरः (सर्पः) इत्यपि प्रयोगो दृश्यते ॥

दर्विः=कम्वा (कड़छी वा डोई इति लौकिकाः) । वेदिः= परिष्कृता भूमिः (चबूतरा इति भाषायाम्) । खनिः=आकरः (खान इति भाषायाम्) । शानिः=कसौटी इति भाषायाम् । अश्रिः=कोटिः (अग्रभागः) । कृषिः=स्पष्टार्थः । ओषधिः = फलपाकान्ता । कटिः=श्रोणिः (कटिप्रदेशः) । अङ्गुलिः= करशाखा ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२५–तिथिनाडिरुचिवीचिनालिधूलिकिकिकेलिछवि-रात्र्यादयः ।। २५ ।।

तिथि – नाडि–रुचि–वीचि–नालि–धूलि–किकि–केलि–छवि–रात्र्यादयः १।३॥ तिथि-नाडि-रुचि-वीचि-नालि-धूलि-किकि-केलि-छवि-रात्र्यादयः शब्दाः स्त्रियां भवन्ति । पक्षे सर्वत्र ङीबपि भवति । इयं तिथिः. तिथी वा इयं नाडिः, नाडी वा । इयं रुचिः, रुची वा। इयं वीचिः, वीची वा । इयं नालिः, नाली वा । इयं धूलिः, धूली वा । इय किकिः, किकी वा । इयं केलिः, केली वा । इयं छविः, छवी वा । इयं रात्रिः, रात्री वा ।

रात्र्यादय इत्यत्रादिशब्दप्रयोगात् नक्तंदोषाभिन्ना रात्रिपर्याया ग्राह्याः । शर्वरी । निशा । निशीथिनी । रात्रिः । त्रियामा । क्षणदा । क्षपा । विभावरी । तमस्विनी । रजनी । यामिनी । तमी । तमिस्रा । तामसी । इति रात्रिपर्यायाः ।।

तिथिशब्दस्य क्वचित्पुंस्त्वमपि दृश्यते—तिथयोर्द्वयोरित्यमर-प्रयोगः । निखिलान् निशि पूर्णिमातिथीन् इति च नैषधम् ।।

तिथिः=दिनमानम् । नाडिः=धमनिः । रुचिः=प्रभा, अभिष्वङ्गः, स्पृहा, गभस्तिर्वा । वीचिः=ऊर्मिः । नालि.=नाडी । धूलिः=पांशुः । किकिः=नीलकण्ठशब्दः । केलिः=क्रीडा । छविः=कान्तिः । रात्रिः=निशा ।।

२६–शष्कुलिराजिकुट्यवन्तिवर्त्तिभ्रुकुटित्रुटिबलि-पङ्क्तयः ।। २६ ।।

शष्कुलि-राजि-कुटि-अवन्ति-वर्त्ति-भ्रुकुटि-त्रुटि-बलि-पङ्क्तयः १।३।। शष्कुलि-राजि-कुटि-अवन्ति-वर्त्ति-भ्रुकुटि-त्रुटि-बलि-पङ्क्तय एते नव शब्दाः स्त्रियां भवन्ति । पक्षे सर्वत्र ङीबपि द्रष्टव्यः । इयं शष्कुलिः, शष्कुली वा । इयं राजिः, राजी वा । इयं कुटिः, कुटी

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वा । इयमवन्तिः, अवन्ती वा । इयं वर्त्तिः, वर्त्ती वा । इयं भ्रुकुटिः, भ्रुकुटी वा । इयं त्रुटिः, त्रुटी वा । इयं वलिः, बली वा । इयं पङ्क्तिः, पङ्क्ती वा ।

'अवलम्बितकर्णशष्कुलीकलसीकम्' इति, 'राजीवराजीवशलोलभृङ्गम्' इति च नैषधे ङीवन्तप्रयोगो दृश्यते ।

शष्कुलिः=कर्णच्छिद्रं पक्वान्नं वा । राजिः=पङ्क्तिः । कुटिः=निवासः । अवन्तिः=उज्जयिनी । वर्तिः=गात्रानुलेपनी । भ्रुकुटिः=प्रमिला । भ्रकुटिः, भ्रुकुटिः, भ्रूकुटिरित्यनर्थान्तरम् । त्रुटिः=मात्रा, सूक्ष्मैला, त्रिपुटा । वलिः=प्राण्यङ्गजः । करोपहारयोरर्थयोर्बलिशब्दः पुंसि प्राण्यङ्गजेऽर्थे स्त्रियाम् । पङ्क्तिः=श्रेणी ॥

२७—प्रतिपदापद्विपत्सम्पच्छरत्संसत्परिषदुषःसंवित्क्षुत्पुन्मुत्समिधः ॥ २७ ॥

प्रतिपद्-आपद्-विपत्-सम्पत्-शरत्-संसत्-परिषत्-उषस्-संवित्-क्षुत्-पुत् मुत्-समिधः १।३॥ प्रतिपद्-आपद्-विपत्-सम्पत्-शरत्-संसत्-परिषत् उपस्-संवित्-क्षुत्-पुत्-मुत्-समित् एते त्रयोदश शब्दाः स्त्रियां भवन्ति । इयं प्रतिपत् । इयमापत् । इयं विपत् । इयं सम्पत् । इय शरत् । इयं संसत् । इयं परिषत् । इयमुषाः । इय संवित् । इयं क्षुत् । इयं पुत् । इयं मुत् । इयं समित् ॥

प्रतिपत्=तिथिनाम, बुद्धिर्वा । आपत्=विपत्तिः । विपत्=आपत्तिः । सम्पत्=सम्पत्तिः । शरत्=ऋतुनाम । संसत्=सभा । परिषत्=सभा । उपाः=कल्यम् । संवित्=बुद्धिः, प्रतिज्ञानं वा । क्षुत्=छिक्का (छींक) । पुत्=नरकः । मुत्=प्रीतिः । समित्=इन्धनम् ॥

२८—आशीर्धूःपूर्गीर्द्वारः ॥ २८ ॥

आशीर्-धूः-पूर्-गीर्-द्वारः १।३॥ आशीर्-धूः-पूर्-गीर्-द्वार् एते पंच शब्दाः स्त्रियां भवन्ति । इयमाशीः । इयं धूः । इयं पूः । इयं

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गीः। इयं द्वाः॥

आशीः=हितेच्छा, अहिदंष्ट्रा वा। धूः=यानमुखम्। पूः=नगरी। गीः=वाणी। द्वाः=द्वारम्॥

२९—अप्सुमनस्समासिकतावर्षाणां बहुत्वं च ॥२९॥

अप्-सुमनस्-समा-सिकता-वर्षाणाम् ६।३ बहुत्वम् १।१ च अ०॥ अप्-सुमनस्-समा-सिकता-वर्षा एते पंच शब्दाः स्त्रियां बहुवचने च भवन्ति। इमा आपः। इमाः सुमनसः। इमाः समाः। इमाः सिकताः। इमा वर्षाः॥

पुष्पसामान्यवाचिनः सुमनश्शब्दस्य बहुत्वं जातिविशेषवाचकत्वे चैकत्वं यथा—सुमना मालती। देववाची सुमनस्-शब्दः पुंसि न स्त्रियां यथा—सुपर्वाणः सुमनसः।

अवादीनां बहुत्वमनित्यम्। विभाषा घ्राधेट् (अष्टाध्यायी) इति सूत्रे 'अघ्रासातां सुमनसौ' इति हरदत्तः। समां समां विजायते (५।२) इत्यत्र भाष्ये समायां समायामिति प्रयोगात्। अर्थवदधातु० (१।२) इत्यत्र च भाष्ये 'एका च सिकता तैलदानेऽसमर्थे'ति सिकताशब्दस्यैकवचने प्रयोगात्।

आपः=जलम्। सुमनसः=कुसुमम्। समाः=संवत्सरः। सिकताः=वालुका। वर्षाः=स्पष्टम्॥

३०—स्रक्त्वग्ज्योग्वाग्यवागूनौस्फिजः ॥ ३० ॥

स्रक्-त्वक्-ज्योक्-वाक्-नौ-स्फिजः १।३॥ स्रक्-त्वक्-ज्योक्-वाक्-नौ-स्फिक् एते सप्त शब्दाः स्त्रियां भवन्ति। इयं स्रक्। इयं त्वक्। इयं ज्योक्। इयं वाक्। इयं यवागूः। इयं नौः। इयं स्फिक्॥

स्रक्=माला। त्वक्=त्वचा। वाक्=वाणी। यवागूः=उष्णिका। नौः=नौका। स्फिक्=कटिप्रोथः।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

३१–तृटिसीमासंबध्या: ॥ ३१ ॥

तृटि-सीमा-संवध्या: १।३॥ तृटि-सीमा-संबध्या एते त्रय: शव्दा: स्त्रियां भवन्ति। इयं तृटि:। इयं सीमा। इयं संवध्या॥

सीमा=ग्रामान्त:।

३२–चुल्लिवेणिखार्यश्च ॥ ३२ ॥

चुल्लि-वेणि-खार्य: १।३ च अ० प० ॥ चुल्लि-वेणि-खारी एते त्रय: शव्दा: स्त्रियां भवन्ति। इयं चुल्लि:। इयं वेणि:। इयं खारी॥

चुल्लि:=चूल्हा इति भाषायाम्। वेणि:=शिखा। खारी=परिमाणविशेष: (१२ मन ३२ सेर)॥

३३–ताराधाराज्योत्स्नादयश्च ॥ ३३ ॥

तारा-धारा-ज्योत्स्नादय: १।३ च अ० प० ॥ तारा-धारा-ज्योत्स्नादय: शव्दा: स्त्रियां भवन्ति। इयं तारा। इयं धारा। इयं ज्योत्स्ना॥

तारा=नक्षत्रम्। धारा=जलप्रवाह:। ज्योत्स्ना=चन्द्रिका॥

३४–शलाका स्त्रियां नित्यम् । ३४ ॥

शलाका १।१ स्त्रियाम् ७।१ नित्यम् १।१॥ शलाकाशब्दो नित्यं स्त्रियां भवति। इयं शलाका। अत्र नित्यग्रहणमन्येषां क्वचिद्-व्यभिचारज्ञापनार्थम्॥

शलाका=सलाई इति भाषायाम्।

॥ इति स्त्रीलिङ्गप्रकरणम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ पुंलिङ्गप्रकरणम्

३५–पुमान् ॥ १ ॥

पुमान् १।१॥ पुमानित्यधिकारोऽयम् ।

३६–घञबन्तः ॥ २ ॥

घञ्-अबन्तः १ १॥ घञ् च अप् च तौ घञपौ, घञपावन्ते यस्य स घञवन्तः । घञ्-प्रत्ययान्तोऽप्-प्रत्ययान्तश्च शब्दः पुंसि भवति । घञ्–पाकः । त्यागः ॥ अप्-करः । गरः ॥

नपुंसके भावे क्त-ल्युटौ, स्त्रियां भावे क्तिन्नादयः कर्मादौ तु घञाद्यन्तं विशेष्यलिङ्गम्, तथा च भाष्ये–'सम्वन्धमनुवर्त्तिष्यते' इति। एवं पारिशेष्यात् भावे यो घञ् तदन्तस्य पुंस्त्वं विज्ञेयम् ॥

३७–घाजन्तश्च ॥ ३ ॥

घ-अजन्तः १।१ च अ० प० ॥ घश्च अच् च तौ घाचौ, घाचावन्ते यस्य स घाजन्तः । घप्रत्ययान्तोऽच्प्रत्ययान्तश्च शब्दः पुंसि भवति । घ–गोचरः । संचरः । अच्–चयः । जय इत्यादि ॥

३८–भयलिङ्गभगपदानि नपुंसके ॥ ४ ॥

भय-लिङ्ग-भग-पदानि १।३ नपुंसके ७।१॥ भय-लिङ्ग-भग-पदानि चत्वारि शब्दरूपाणि नपुंसके भवन्ति । इदं भयम् । इदं लिङ्गम । इदं भगम् । इदं पदम् ॥

भयम्=स्पष्टम् । लिङ्गम्=चिह्नं शेफो वा। भगम्=योनिः। पदम्=स्थानम् ॥

३९–नङन्तः ॥ ५ ॥

नङ्-अन्तः १।१॥ नङ्-प्रत्ययान्तः शब्दः पुंसि भवति । अयं यज्ञः । अयं यत्नः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यज्ञ इत्यादौ यजयाच० (३।३।९०) इति नङ् प्रत्ययः। यज्+नङ्+सु। यज्+ञ+रु=यज्ञः। एवं यतीधातोर्यत्नः॥

४०—याच्ञा स्त्रियाम्॥ ६॥

याच्ञा १।१ स्त्रियाम् ७।१॥ नङ्-प्रत्ययान्तो याच्ञाशब्दः स्त्रियां भवति। पूर्वस्यायमपवादः। इयं याच्ञा॥ याच्ञा=अभिशस्तिः, याचना, प्रार्थना इति याच्ञापर्यायाः॥

४१—क्यन्तो घुः॥ ७॥

कि-अन्तः १।१ घुः १।१॥ किरन्ते यस्य स क्यन्तः। कि-प्रत्ययान्तो घुसंज्ञकधातुजः शब्दः पुंसि भवति। अयमाधिः। अयं व्याधिः। अयं निधिः। अयमुदधिः॥

आधिरित्यादौ 'उपसर्गे घोः किः' (३।३।९२) इति किः प्रत्ययः। आ+धा+कि+सु=आधिः। एवं व्याध्यादयः॥

क्यन्त इति किम्? दानम्। घुरिति किम्? जज्ञिर्बीजम्।

४२—इषुधिः स्त्री च॥ ८॥

इषुधिः १।१ स्त्री १।१ च अ० प०॥ कि-प्रत्ययान्तो घुसंज्ञकधातुज इषुधिशब्दः पुंसि स्त्रियां च भवति। पूर्वस्यायमपवादः। अयमिषुधिः। इयमिषुधिः॥ इषुधिः=तूणीरनिषङ्गा॥

४३—देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि॥ ९॥

देव–असुर–आत्म–स्वर्ग–गिरि–समुद्र-नख-केश-दन्त-स्तन-भुज-कण्ठ-खड्ग-शर-पङ्काभिधानानि १।३॥ देव-असुर-आत्म-स्वर्ग-गिरि-समुद्र–नख–केश-दन्त–स्तन–भुज–कण्ठ–खड्ग-शर-पङ्क एते पंचदश शब्दा एषां पर्यायवाचिनश्च पुंसि भवन्ति। देवाः, सुराः। असुराः, दैत्याः। आत्मा, क्षेत्रज्ञः। स्वर्गः, नाकः। गिरिः, पर्वतः। समुद्रः,

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अक्षि: । नखः, कररुहः । केशः, शिरोरुहः । दन्तः, दशनः । स्तनः, कुचः । भुजः, दोः । कण्ठः, गलः । खड्गः, करवालः । शरः, मार्गणः । पङ्कः, कर्दमः । इत्यादि ॥

४४–त्रिविष्टपत्रिभुवने नपुंसके ॥ १० ॥

त्रिविष्टप-त्रिभुवने १।२ नपुंसके ७।१॥ स्वर्गाभिधानौ त्रिविष्टप-त्रिभुवनशब्दौ नपुंसके भवतः । स्वर्गवाचित्वात्पूर्वेण पुंस्त्वे प्राप्ते नपुंसकत्वं विधीयते । इदं त्रिविष्टपम् । इदं त्रिभुवनम् ॥

त्रिविष्टपम् = स्वर्गः । त्रिभुवनम् = स्वर्गः ॥

४५–द्यौः स्त्रियाम् ॥ ११ ॥

द्यौः १।१ स्त्रियाम् ७।१॥ स्वर्गाभिधानो द्यौः शब्दः स्त्रियां भवति । स्वर्गवाचित्वात्पूर्वेण पुंस्त्वे प्राप्ते स्त्रीत्वं विधीयते । इयं द्यौः । द्यौः = सुरलोकः ॥

४६–इषुबाहू स्त्रियां च ॥ १२ ॥

इषु-बाहू १।२ स्त्रियां ७।१ च अ० प० ॥ इषु-बाहुशब्दौ पुंसि स्त्रियां च भवतः । शरभुजाभिधानत्वात्पुंस्त्वे प्राप्ते वचनम् । अयमिषुः । इयमिषुः । अयं बाहुः । इयं बाहुः ॥ इषुः = कलम्बः, मार्गणः, शरः पत्री, रोपः इति इषुपर्यायाः । बाहुः = भुजः, प्रवेष्टः, दोः, इति बाहुपर्यायाः ॥

४७–बाणकाण्डौ नपुंसके च ॥ १३ ॥

बाण-काण्डौ १।२ नपुंसके ७।१ च अ० प० ॥ बाण-काण्ड-शब्दौ पुंसि नपुंसके च भवतः । शराभिधानत्वात्पुंस्त्वे प्राप्ते वचनम् । अयं बाणः । इदं बाणम् । अयं काण्डः । इदं काण्डम् ॥

त्रिविष्टपत्रिभुवने नपुंसके इत्यादि चतुःसूत्री देवासुर० इति योगस्यापवादः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

४८—नन्तः ॥ १४ ॥

न्-अन्तः १।१॥ नकारान्तः शब्दः पुंसि भवति । अयं राजा । अयं तक्षा । अयं श्वा । अयं वृषा । अयं उक्षा । अयं मघवा । इत्यादि ॥

चर्मवर्मादयो नकारान्ता नपुंसके, न पुंसि, तेषां 'मनृद्व्यच्कोऽकर्तरी'ति नपुंसके विधानात् ।

४९—क्रतुपुरुषकपोलगुल्फमेघाभिधानानि ॥ १५ ॥

क्रतु-पुरुष-कपोल-गुल्फ-मेघाभिधानानि १।३॥ क्रतु-पुरुष-कपोल-गुल्फ-मेघाः एते पंचशब्दा एषां पर्यायवाचिनश्च पुंसि भवन्ति । क्रतुः, अध्वरः । पुरुषः, नरः । कपोलः, गण्डः । गुल्फः, प्रपदः । मेघः, नीरदः ॥

५०—अभ्रं नपुंसकम् ॥ १६ ॥

अभ्रम् १।१ नपुंसकम् १।१॥ मेघाभिधानोऽभ्रशब्दो नपुंसके भवति । मेघवाचित्वात्पूर्वेण पुंस्त्वे प्राप्ते वचनम् । इदम् अभ्रम् । अभ्रम्=मेघः ॥

५१—उकारान्तः ॥ १७ ॥

उकारान्तः १।१॥ उकारान्तः शब्दः पुंसि भवति । अयं प्रभुः । अयमिक्षुः ॥

५२—धेनुरज्जुकुहुसरयुतनुरेणुप्रियङ्गवः स्त्रियाम् ॥ १८ ॥

धेनु-रज्जु-कुहु-सरयु-तनु-रेणु-प्रियङ्गवः १।३ स्त्रियाम् ७।१॥ धेनु-रज्जु-कुहु-सरयु तनु-रेणु-प्रियङ्गव एते उकारान्ताः सप्त शब्दाः स्त्रियां भवन्ति । इयं धेनुः इयं रज्जुः । इयं कुहुः । इयं सरयुः । इयं तनुः । इयं रेणुः । इयं प्रियङ्गुः ॥

धेनुः=नवप्रसूता । रज्जुः=बन्धनसाधनम् । कुहुः=अमावस्या सरयुः=नदीविशेषः । तनुः=शरीरम् । रेणुः=धूलिका । प्रियङ्गुः =लताविशेषः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

५३–समासे रज्जुः पुंसि च ॥ १६ ॥

समासे ७।१ रज्जुः १।१ पुंसि ७।१ च अ० प० ॥ समासे रज्जुशब्दः स्त्रियां पुंसि च भवति । कर्कटरज्ज्वा (स्त्री०) कर्कटरज्जुना (पुं०) ॥

५४–श्मश्रुजानुवसुस्वाद्वश्रुजतुत्रपुतालूनि नपुंसके ॥२०॥

श्मश्रु-जानु-वसु-स्वादु-अश्रु-जतु-त्रपु-तालूनि १।३ नपुंसके ७।१॥ श्मश्रु-जानु वसु-स्वादु-अश्रु-जतु-त्रपु-तालूनि एतेऽष्टौ शब्दा नपुंसके भवन्ति। उकारान्तत्वात्पुंस्त्वे प्राप्ते नपुंसकत्वं विधीयते। इदं श्मश्रु । इदं जानु । इदं वसु । इदं स्वादु । इदमश्रु । इदं जतु । इदं त्रपु । इदं तालु ॥

श्मश्रु=मूछ इति भाषायाम् । जानु=घुटना इति भाषायाम् । वसु=द्रव्यम् । स्वादु=इष्टं मधुरं वा । अश्रु=नेत्राम्बु । जतु= लाक्षा । त्रपु=सीसकम् । तालु=काकुदम् ॥

५५–वसु चार्थवाचि ॥ २१ ॥

वसु १।१ च अ० अर्थवाचि १।१॥ अर्थवाची वसुशब्दो नपुंसके भवति । वसु=धनम् । अर्थवाचीति किम् ? मयूख-अग्नि-धनाधिपेष्वर्थेषु देवभेदे च वसुशब्दः पुंसि ।

५६–मद्गुमधुसीधुशीधुसानुकमण्डलूनि नपुंसके च । २२॥

मद्गु-मधु-सीधु-शीधु-सानु-कमण्डलूनि १।३ नपुंसके ७।१ च अ० ॥ मद्गु-मधु-सीधु-शीधु-सानु-कमण्डलूनि एते षट् शब्दाः पुंसि नपुंसके च भवन्ति। उकारान्तत्वात्पुंस्त्वे प्राप्ते पक्षे नपुंसकार्थं वचनम् । अयं मद्गुः । इदं मद्गु । अयं मधुः । इदं मधु । अयं सीधुः । इदं सीधु । अयं शीधुः । इदं शीधु । अयं सानुः । इदं सानु । अयं कमण्डलुः । इदं कमण्डलु ॥ वसन्ते (चैत्रे) दैत्यभेदे च मधुशब्दः पुंसि । क्षौद्र-वाची तु नपुंसक एव ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मद्गुः=जलवायसः। मधु =माक्षिकम्। सीधुः=आसवः। शीधुः=मद्यम्। सानुः=शिखा। कमण्डलुः=जलपात्रम्॥

५७—रुत्वन्तः॥ २३॥

रु-तु-अन्तः १।१॥ रुश्च तुश्च तौ रुतू, रुतू अन्ते यस्य स रुत्वन्तः। रु-अन्तः, तु-अन्तश्च शब्दः पुंसि भवति। रु-मेरुः। तु-सेतुः॥

५८—दारुकशेरुजतुवस्तुमस्तूनि नपुंसके॥ २४॥

दारु-कशेरु-जतु-वस्तु-मस्तूनि १।३ नपुंसके ७।१॥ दारु-कशेरु-जतु-वस्तु-मस्तूनि एते पंच शब्दा नपुंसके भवन्ति। रु-अन्तत्वात् तु-अन्तत्वाच्च पूर्वेण पुंस्त्वे प्राप्ते नपुंसकत्वं विधीयते। पूर्वसूत्रस्यायमपवादः। इदं दारु। इदं कशेरु। इदं जतु। इदं वस्तु इदं मस्तु॥

दारु=काष्ठम। कशेरु=पृष्ठास्थि। जतु=लाक्षा। वस्तु=पदार्थः। मस्तु=दधिजलम्॥

५९—सक्तुर्नपुंसके च॥ २५॥

सक्तुः १।१ नपुंसके ७।१ च अ० प०॥ सक्तुशब्दः पुँसि नपुंसके च भवति। तु-अन्तत्वेन पूर्वेण पुंस्त्वे प्राप्ते पक्षे नपुंसकत्वं विधीयते। अयं सक्तुः। इदं सक्तु॥ सक्तुः=सत्तू इति भाषायाम्।

६०—प्राग्रश्मेरकारान्तः २६॥

प्राक् १।१ रश्मेः ५।१ अकारान्तः १।१॥ 'रश्मिदिवसाभिधानानि' (६६) इत्यस्मिन्नेव प्रकरणे वक्ष्यति। प्रागेतस्माद्रश्मिशब्दसंशब्दनादकारान्त इत्यधिकारो वेदितव्यः॥

६१—कोपधः॥ २७॥

कोपधः १।१॥ ककार उपधायां यस्य स कोपधः। ककारोपधोऽकारान्तः शब्दः पुंसि भवति। अयं स्तवकः। अयं कल्कः। अयं कोरक इत्यादि॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारक-पाठकादयः कोपधाः शब्दा विशेषणाभावात् त्रिलिङ्गा यतो हि ते विशेष्यमनुवर्त्तन्ते । अत्र च विशेष्यशब्दानामेव लिङ्गमुपदिश्यते न विशेषणशब्दानामतो न दोषः ॥

६२–चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि नपुंसके ॥ २८ ॥

चिबुक–शालूक-प्रातिपदिक-अंशुक-उल्मुकानि १।३ नपुंसके ७।१।। चिबुक-शालूक-प्रातिपदिक-अंशुक-उल्मुकानि एते पंच शब्दा नपुंसके भवन्ति । कोपधत्वात्पुंस्त्वे प्राप्ते नपुंसकत्वं विधीयते । इदं चिबुकम् । इदं शालूकम् । इदं प्रातिपदिकम् । इदमंशुकम् । इदमुल्मुकम् ।

चिबुकम्=ठोडी इति भाषायाम् । शालूकम्=पद्मकन्दः । प्रातिपदिकम्=अर्थवच्छब्दः । अंशुकम्=वस्त्रम् । उल्मुकम्=अङ्गारः ।

६३–कण्टकानीकसरकमोदकचषकमस्तकपुस्तकतडाकनिष्कशुष्कवर्चस्कपिनाकभाण्डकपिण्डककटकशण्डकपिटकतालकफलकपुलाकानि नपुंसके च ॥ २९ ॥

कण्टक-अनीक-सरक-मोदक-चषक-मस्तक-पुस्तक-तडाक-निष्क-शुष्क-वर्चस्क-पिनाक–भाण्डक-पिण्डक--कटक-शण्डक-पिटक-तालक-फलक-पुलाकानि १।३ नपुंसके ७।१ च अ० अ० ॥ कण्टक-अनीक-सरक-मोदक-चषक-मस्तक-पुस्तक-तडाक-निष्क-शुष्क-वर्चस्क-पिनाक-भाण्डक–पिण्डक–कटक-शण्डक-पिटक-तालक-फलक-पुलाकानि एते विंशतिशब्दाः पुंसि नपुंसके च भवन्ति । कोपधत्वात्पुंस्त्वे प्राप्ते पक्षे नपुंसकार्थं वचनम् । कण्टकः, कण्टकम् । अनीकः, अनीकम् । सरकः, सरकम् । मोदकः, मोदकम् । चषकः, चषकम् । मस्तकः, मस्तकम् । पुस्तकः, पुस्तकम् । तडाकः, तडाकम् । निष्कः, निष्कम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुष्कः, शुष्कम् । वर्चस्कः, वर्चस्कम् । पिनाकः, पिनाकम् । भाण्डकः, भाण्डकम् । पिण्डकः, पिण्डकम् । कटकः, कटकम् । शण्डकः, शण्डकम् । पिटकः, पिटकम् । तालकः, तालकम् । फलकः फलकम् । पुलाकः, पुलाकम् ॥

कण्टकः=कांटा इति भाषायाम् । अनीकः = सैन्यम् । सरकः= चषकः । मोदकः=लड्डू इति भाषायाम् । चषकः=सरकः । मस्तकः=उत्तमाङ्गः । पुस्तकः=ग्रन्थः । तडाकः=सरः । निष्कः= दीनारः । शुष्कः=नीरसः । वर्चस्कः = विष्ठा । पिनाकः=शिवधनुः । भाण्डकः=कटोरा इति भाषायाम् । पिण्डकः=स्फोटकः । कटकः= मेखला । शण्डकः=नपुंसकः । पिटकः मंजूषा । तालकः=ताला इति भाषा । फलकः= ढाल इति भाषा ।

६४–टोपधः ॥ ३० ॥

टोपधः १।१॥ टकार उपधायां यस्य स टोपधः । टकारोपधोऽकारान्तः शब्दः पुंसि भवति । घटः । पट इत्यादि ॥

६५–किरीटमुकुटललाटवटविटशृङ्गाटकराटलोष्टानि नपुंसके ॥ ३१ ॥

किरीट-मुकुट-ललाट–वट–विट–शृङ्गाट–कराट–लोष्टानि १।३ नपुंसके ७।१॥ किरीट-मुकुट-ललाट-वट-विट-शृङ्गाट-कराट-लोष्टानि एतेऽष्टौ शब्दा नपुंसके भवन्ति । टोपधत्वात्पूर्वेण पुंस्त्वे प्राप्ते नपुंसकत्वं विधीयते । इदं किरीटम् । इदं मुकुटम् । इदं ललाटम् । इदं वटम् । इदं विटम् । इदं शृङ्गाटम् । इदं कराटम् । इदं लोष्टम् ॥

किरीटम्=मुकुटम् । मुकुटम्=किरीटम् । ललाटम्=भालम् । वटम्=न्यग्रोधः । विटम्=कामुकः । शृङ्गाटम्=चतुष्पथः । लोष्टम्=मृत्पिण्डः ॥

६६–कुटकूटकपटकवाटकर्पटनटनिकटकीटकटानि नपुंसके च ॥ ३२ ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुट-कूट-कपट-कवाट-कर्पट-नट-निकट-कीट-कटानि १।३ नपुंसके ७।१ च अ० प० ।। कुट-कूट-कपट-कवाट-कर्पट-नट-निकट-कीट-कटानि एते नव शब्दाः पुंसि नपुंसके च भवन्ति । टोपधत्वात्पूर्वेण पुंस्त्वे प्राप्ते पक्षे नपुंसकार्थं वचनम् । कुटः, कुटम् । कूटः, कूटम् । कपटः कपटम् । कवाटः, कवाटम् कर्पटः, कर्पटम् । नटः, नटम् । निकटः, निकटम् । कीटः, कीटम् । कटः, कटम् ।।

कुटः=पर्वतः । कूटः=निश्चलः । कपटः=छलम् । कवाटः=कपाटः । कर्पटः=वस्त्रम् । नटः=नर्तकः । निकटः=समीपम् । कीटः=क्रिमिः । कटः=कटिदेशः, चटाई वा इति भाषा ।

६७—णोपधः ।। ३३ ।।

णोपधः १।१।। णकार उपधायां यस्य स णोपधः । णकारोपधोऽकारान्तः शब्दः पुंसि भवति । अयं गुणः । अयं गणः । अयं पाषाण इत्यादि ।।

६८—ऋणलवणपर्णतोरणरणोष्णानि नपुंसके ।।३४।।

ऋण-लवण-पर्ण तोरण-रण-उष्णानि १।३ नपुंसके ७।१।। ऋण-लवण-पर्ण-तोरण-रण-उष्णानि एते षट् शब्दा नपुंसके भवन्ति । णोपधत्वात्पूर्वेण पुंस्त्वे प्राप्ते नपुंसकत्वं विधीयते । इदमृणम् । इदं लवणम् । इदं पर्णम् । इदं तोरणम् । इदं रणम् । इदमुष्णम् ।।

ऋणम्=उद्धारः । लवणम्=सैन्धवम् । पर्णम्=पत्रम् । तोरणम्=वन्दनमाला । रणम्=युद्धम् । उष्णम्=अशीतम् ।।

६९—कार्षापणस्वर्णसुवर्णव्रणचरणवृषणविषाणचूर्णतृणानि नपुंसके च ।। ३५ ।।

कार्षापण-स्वर्ण-सुवर्ण-व्रण-चरण-वृषण-विषाण-चूर्ण-तृणानि १।३ नपुंसके ७।१ च अ० ।। कार्षापण-स्वर्ण-सुवर्ण-व्रण-चरण-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृषण-विषाण-चूर्ण-तृणानि एते नव शब्दाः पुंसि नपुंसके च भवन्ति। णोपधत्वात्पुंस्त्वे प्राप्ते पक्षे नपुंसकार्थं वचनम्। कार्षापणः, कार्षापणम्। स्वर्णः, स्वर्णम्। सुवर्णः, सुवर्णम्। व्रणः, व्रणम्। चरणः, चरणम्। वृषणः, वृषणम्। विषाणः विषाणम्। चूर्णः, चूर्णम्। तृणः, तृणम्॥

कार्षापण=मुद्राविशेषः। स्वर्णः=हिरण्यम्। सुवर्णः= कनकम्। व्रणः=घातः। चरणः=पादः। वृषणः=अण्डकोषः। विषाणः=शृङ्गः। चूर्णः=क्षोदः। तृणः=तिनका इति भाषा॥

७०—थोपधः॥ ३६॥

थोपधः १।१॥ थकार उपधायां यस्य स थोपधः। थकारोपधोऽकारान्तः शब्दः पुंसि भवति। अयं रथः। अयमर्थ इत्यादि॥

७१—काष्ठपृष्ठसिक्थोक्थानि नपुंसके॥ ३७॥

काष्ठ-पृष्ठ-सिक्थ-उक्थानि १।३ नपुंसके ७।१॥ काष्ठ-पृष्ठ-सिक्थ-उक्थानि एते चत्वारः शब्दा नपुंसके भवन्ति। थकारोपधत्वात् पूर्वेण पुंस्त्वे प्राप्ते नपुंसकत्वं विधीयते। इद काष्ठम्। इद पृष्ठम्। इद सिक्थम्। इदमुक्थम्॥

काष्ठम्=दारु। पृष्ठम्=पीठ इति भाषा। सिक्थम्=मधु। उक्थम्=स्तोत्रम्॥

७२—काष्ठा दिगर्था स्त्रियाम्॥ ३८॥

काष्ठा १।१ दिगर्था १।१ स्त्रियाम् ७।१॥ दिग्वाचकः काष्ठाशब्दः स्त्रियां भवति। थकारोपधत्वात्पुंस्त्वे प्राप्ते स्त्रीत्वविधानार्थं वचनम्। इमाः काष्ठाः॥ काष्ठा=दिशा॥

'दिशि' इत्येतावतैवेष्टसिद्धेर्दिगर्थेति सगौरवं वचनं सीमार्थोऽपि काष्ठाशब्दः स्त्रियां भवतीति ज्ञापनार्थम्। यथा च कवि कालिदासप्रयोगः—'स्वयं विशीर्णद्रुमपर्णवृत्तिता परा हि काष्ठा'।

७३—तीर्थप्रोथयूथगाथानि नपुंसके च॥ ३९॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तीर्थ-प्रोथ-यूथ-गाथानि १।३ नपुंसके ७।१ च अ० प० ।। तीर्थ-प्रोथ-यूथ-गाथानि एते चत्वारः शब्दाः पुंसि नपुंसके च भवन्ति। थकारोपधत्वात् पुंस्त्वे प्राप्ते पक्षे नपुंसकार्थं वचनम्। चकारेणात्र प्रकरणवशात्पुंसीत्यनुषज्यते न स्त्रियाम्। "तीर्थः, तीर्थम्। प्रोथः, प्रोथम्। यूथः, यूथम्। गाथः, गाथम्।।

तीर्थः = पुण्यस्थानम्। प्रोथः=शूकरनासिका। यूथः= सजातीयसमूहः। गाथः=गीतं भजनादिकम्।

७४—नोपधः ।। ४० ।।

नोपधः १ १।। नकार उपधायां यस्य स नोपधः। नकारोपधोऽकारान्तः शब्दः पुंसि भवति। अयमिनः [अयम्+इनः]। अयं फेन इत्यादि ।।

७५—जघनाजिनतुहिनकाननवनवृजिनविपिनवेतनशासनसोपानमिथुनश्मशानरत्ननिम्नचिह्नानि नपुंसके ।। ४१ ।।

जघन-अजिन—तुहिन--कानन वन--वृजिन-विपिन-वेतन—शासन-सोपान-मिथुन श्मशान-रत्न-निम्न-चिह्नानि १।३ नपुंसके ७।१।। जघन-अजिन-तुहिन-कानन वन-वृजिन-विपिन-वेतन-शासन--सोपान-मिथुन-श्मशान-रत्न-निम्न-चिह्नानि एते पञ्चदश शब्दा नपुंसके भवन्ति। नोपधत्वात्पुंस्त्वे प्राप्ते नपुंसकत्वं विधीयते। इदं जघनम्। इदमजिनम्। इदं तुहिनम्। इदं काननम्। इदं वनम्। इदं वृजिनम्। इदं विपिनम्। इदं वेतनम्। इदं शासनम्। इदं सोपानम्। इदं मिथुनम्। इदं श्मशानम्। इदं रत्नम्। इदं निम्नम्। इदं चिह्नम्।।

जघनम्=स्त्रीकट्याः पुरोभागः। अजिनम्=चर्म। तुहिनम्= हिमम्। काननम्=वनम्। वनम्=काननम्। वृजिनम्=पापम्। विपिनम्=जङ्गलम्। वेतनम्=वृत्तिः। शासनम्=आदेशः। सोपानम्=निःश्रेणिः। मिथुनम्=समागमः। श्मशानम्=दाहस्थानम्। रत्नम्=मणिः। निम्नम्=नीचम्। चिह्नम्=लक्षणम्।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

७६–मानयानाभिधाननलिनपुलिनोद्यानशयनासनस्थान-चन्दनाऽऽलानसमानभवनवसनसंभावनविभावनविमानानि नपुंसके च ।। ४२ ।।

मान-यान-अभिधान-नलिन-पुलिन-उद्यान--शयन-आसन-स्थान-चन्दन-आलान-समान-भवन-वसन-संभावन-विभावन-विमानानि १।३ नपुंसके ७।१ च अ० प० ।। मान-यान-अभिधान-नलिन-पुलिन-उद्यान-शयन-आसन-स्थान--चन्दन--आलान--समान--भवन--वसन--संभावन-विभावन-विमानानि एते सप्तदश शब्दाः पुंसि नपुंसके च भवन्ति । नोपधत्वात्पूर्वेण पुंस्त्वे प्राप्ते पक्षे नपुंसकार्थं वचनम् । मानः मानम् । यानः, यानम् । अभिधानः, अभिधानम् । नलिनः, नलिनम् । पुलिनः, पुलिनम् । उद्यानः, उद्यानम् । शयनः, शयनम् । आसनः, आसनम् । स्थानः, स्थानम् । चन्दनः, चन्दनम् । आलानः, आलानम् । समानः, समानम् । भवनः, भवनम् । वसनः, वसनम् । संभावनः, संभावनम् । विभावनः, विभावनम् । विमानः विमानम् ।

मानम्=सत्कारः । यानम्=वाहनम् । अभिधानम्=नाम । नलिनम्=कमलपुष्पम् । पुलिनम्=तटः । उद्यानम्=उपवनम् । शयनम्=पर्य्यङ्कः । आसनम्=पीठः । स्थानम्=गेहम् । चन्दनम्=मलयजः । आलानम्=बन्धनम् । समानम्=सदृशम् । भवनम्=गृहम् । वसनम्=वस्त्रम् । संभावनम्=संभावना । विभावनम्=कल्पना । विमानम्=व्योमयानम्, देवरथः ।।

७७–पोपधः ।। ४३ ।।

पोपधः १।१ । पकार उपधायां यस्य स पोपधः । पोपधोऽकारान्तः शब्दः पुंसि भवति । अयं यूपः । अयं दीपः । अयं सर्पः इत्यादि ।।

७८–पापरूपोडुपतल्पशिल्पपुष्पशष्पसमीपाऽन्तरीपाणि नपुंसके ।। ४४ ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाप-रूप-उडुप-तल्प-शिल्प-पुष्प-शष्प-समीप-अन्तरीपाणि १।३ नपुंसके ७।१।। पाप-रूप-उडुप-तल्प--शिल्प--पुष्प--शष्प-समीप-अन्तरीपाणि एते नव शब्दाः नपुंसके भवन्ति। पोपधत्वात्पूर्वेण पुंस्त्वे प्राप्ते नपुंसकत्वं विधीयते। इदं पापम्। इदम् रूपम्। इदमुडुपम्। इदं तल्पम्। इदं शिल्पम्। इदं पुष्पम्। इदं शष्पम्। इदं समीपम्। इदमन्तरीपम्।

पापम्=किल्विपम्। रूपम्=सौंदर्यम्। उडुपम्=प्लवः। तल्पम्=शय्या। शिल्पम्=क्रियाकौशलम्। पुष्पम्=सुमम्। शष्पम्=वालतृणम्। समीपम्=निकटम्। अन्तरीपम्=द्वीपम्।

७९—शूर्पकुतपकुणपद्वीपविटपानि नपुंसके च ।। ४५ ।।

शूर्प-कुतप-कुणप-द्वीप-विटपानि १।३ नपुंसके ७।१ च अ०प० ।। शूर्प कुतप-कुणप-द्वीप-विटपानि एते पंच शब्दाः पुंसि नपुंसके च भवन्ति। पोपधत्वात्पूर्वेण पुंस्त्वे प्राप्ते पक्षे नपुंसकार्थं वचनम्। शूर्पः, शूर्पम्। कुतपः, कुतपम्। कुणपः, कुणपम्। द्वीपः द्वीपम्।

शूर्पः=प्रस्फोटनम्। कुतपः=अह्नोऽष्टमोंऽशः। कुणपः=शवम्। द्वीपः=जलवेष्टितभूमिः। विटपः=तरुः ।।

८०—भोपधः ।। ४६ ।।

भोपधः १।१ ।। भकार उपधायां यस्य स भोपधः। भोपधोऽकारान्तः शब्दः पुंसि भवंति। अयं स्तम्भः। अयं कुम्भ इत्यादि ।।

८१—तलभं नपुंसकम् ।। ४७ ।।

तलभम् १।१ नपुंसकम् १।१ ।। भोपधस्तलभशब्दो नपुंसके भवति। भकारोपधत्वापूर्वेण पुंस्त्वे प्राप्ते नपुंसकत्वं विधीयते। इदं तलभम् ।।

८२—जृम्भं नपुंसके च ।। ४८ ।।

जृम्भम् १।१ नपुंसके ७।१ च अ० प० ।। भोपधो जृम्भशब्दः पुंसि नपुंसके च भवति। भकारोपधत्वात् पूर्वेण पुंस्त्वे प्राप्ते पक्षे

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नपुंसकार्थं वचनम् । अयं जृम्भः । इदं जृम्भम् । जृम्भः=जृम्भणम् ॥

८३—मोपधः ॥ ४९ ॥

मोपधः १।१॥ मकार उपधायां यस्य स मोपधः । मोपधोऽकारान्तः शब्दः पुंसि भवति । अयं सोमः । अयं भीम इत्यादि ॥

८४—रुक्मसिध्मयुध्मेध्मगुल्माध्यात्मकुङ्कुमानि नपुंसके ॥ ५० ॥

रुक्म-सिध्म युध्म-इध्म-गुल्म-अध्यात्म-कुङ्कुमानि १।३ नपुंसके ७।१॥ रुक्म-सिध्म-युध्म-इध्म-गुल्म अध्यात्म-कुङ्कुमानि एते सप्त शब्दाः नपुंसके भवन्ति । मोपधत्वात्पूर्वेण पुंस्त्वे प्राप्ते नपुंसकत्वं विधीयते । इदं रुक्मम् । इदं सिध्मम् । इदं युध्मम् । इदमिध्मम् । इदं गुल्मम् । इदमध्यात्मम् । इदं कुङ्कुमम् ॥

रुक्मम्=सुवर्णम् । सिध्मम्=कुष्ठरोगः । युध्मम्=युद्धम् । इध्मम्=इन्धनम् । गुल्मम्=अप्रकाण्डवृक्षः । अध्यात्मम्=ब्रह्म । कुङ्कुमम्=कश्मीरजन्म ॥

८५—संग्रामदाडिमकुसुमाश्रमक्षेमक्षौमहोमोद्दामानि नपुंसके च ॥ ५१ ॥

संग्राम—दाडिम—कुसुम—आश्रम—क्षेम—क्षौम—होम—उद्दामानि १।३ नपुंसके ७।१ च अ० प० ॥ संग्राम-दाडिम-कुसुम-आश्रम-क्षेम-क्षौम-होम-उद्दामानि एतेऽष्टौ शब्दाः पुंसि नपुंसके च भवन्ति । मोपधत्वात्पूर्वेण पुंस्त्वे प्राप्ते पक्षे नपुंसकार्थं वचनम् । संग्रामः, संग्रामम् । दाडिमः, दाडिमम् । कुसुमः, कुसुमम् । आश्रमः, आश्रमम् । क्षेमः, क्षेमम् । क्षौमः, क्षौमम् । होमः, होमम् । उद्दामः, उद्दामम् ॥

संग्रामः=युद्धम् । दाडिमः=कुट्टिमः (अनार) । कुसुमः= पुष्पम् । आश्रमः=मुनीनां वासस्थानम् क्षेमः=मङ्गलम् । क्षौमः=दुकूलम् । होमः=हवनम् । उद्दामः=बन्धनरहितः स्वतन्त्रः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

८६—योपधः ॥ ५२ ॥

योपधः १।१॥ यकार उपधायां यस्य स योपधः । योपधोऽकारान्तः शब्दः पुंसि भवति । अयं समयः । अयं हय इत्यादि ॥

८७—किसलयहृदयेन्द्रियोत्तरीयाणि नपुंसके ॥ ५३ ॥

किसलय-हृदय-इन्द्रिय-उत्तरीयाणि १।३ नपुंसके ७।१॥ किसलय-हृदय-इन्द्रिय-उत्तरीयाणि एते चत्वारः शब्दा नपुंसके भवन्ति । यकारोपधत्वात्पूर्वेण पुंस्त्वे प्राप्ते नपुंसकत्वं विधीयते । इदं किसलयम् । इदं हृदयम् । इदमिन्द्रियम् । इदमुत्तरीयम् ॥

किसलयम्=पल्लवः । हृदयम्=चित्तम । इन्द्रियम्=भोगसाधनम् । उत्तरीयम्=प्रावारः ॥

८८—गोमयकषायमलयान्वयाव्ययानि नपुंसके च ॥५४॥

गोमय-कषाय-मलय-अन्वय-अव्ययानि १।३ नपुंसके ७।१ च अ० प० ॥ गोमय-कषाय-मलय-अन्वय-अव्ययानि एते पंच शब्दाः पुंसि नपुंसके च भवन्ति । यकारोपधत्वात् पूर्वेण पुंस्त्वे प्राप्ते पक्षे नपुंसकार्थं वचनम् । गोमयः, गोमयम् । कषायः, कषायम् । मलयः, मलयम् । अन्वयः, अन्वयम् । अव्ययः, अव्ययम् ॥

गोमयः=गोशकृत् । कषायः=तुवरः कसैला इति भाषा । मलयः=पर्वतविशेषः । अन्वयः=वंशः । अव्ययः=नित्यः ।

८९—रोपधः ॥ ५५ ॥

रोपधः १।१॥ रेफ उपधायां यस्य स रोपधः । रोपधोऽकारान्तः शब्दः पुंसि भवति । अयं क्षुरः । अयमङ्कुर इत्यादि ॥

९०—द्वाराग्रस्फारतक्रवक्रवप्रक्षिप्रक्षुद्रनीरतीरदूरकृच्छ्ररन्ध्राश्वश्वभ्रभीरगभीरक्रूरविचित्रकेयूरकेदारोदराजस्र-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरीरकन्दरमन्दारपञ्जराजरजठराजिरवैरचामरपुष्करगह्वर-कुहरकुटीरकुलीरचत्वरकाश्मीरनीराम्बरशिशिरतन्त्रयन्त्र-क्षत्रक्षेत्रमित्रकलत्रचित्रमूत्रसूत्रवक्त्रनेत्रगोत्राङ्गुलित्रभलत्र-शस्त्रशास्त्रवस्त्रपत्रपात्रच्छत्राणि नपुंसके ॥ ५६ ॥

द्वार-अग्र-स्फार-तक्र--वक्र-वप्र--क्षिप्र-क्षुद्र-नीर--तीर-दूर-कृच्छ्र-रन्ध्र-अश्र--श्वभ्र-भीर--गभीर--क्रूर--विचित्र-केयूर-केदार--उदर-अजस्र-शरीर-कन्दर-मन्दार--पंजर-अजर--जठर--अजिर-वैर--चामर--पुष्कर-गह्वर-कुहर-कुटीर-कुलीर-चत्वर-काश्मीर-नीर-अम्बर--शिशिर-तन्त्र-यन्त्र-क्षत्र-क्षेत्र-मित्र-कलत्र-चित्र--मूत्र सूत्र वक्त्र-नेत्र--गोत्र- अंगुलित्र-भलत्र-शस्त्र-शास्त्र-वस्त्र-पत्र-पात्र-छत्राणि १।३ नपुंसके ७।१ ॥

इमे द्वारादयो द्वाषष्टिः (६२) शब्दा नपुंसके भवन्ति। रोपधत्वात् पूर्वेण पुंस्त्वे प्राप्ते नपुंसकत्वं विधीयते। इदं द्वारम्। अग्रम्। स्फारम्। तक्रम्। वक्रम्। वप्रम्। क्षिप्रम्। क्षुद्रम्। नीरम्। तीरम्। दूरम्। कृच्छ्रम्। रन्ध्रम्। अश्रम्। श्वभ्रम्। भीरम्। गभीरम्। क्रूरम्। विचित्रम्। केयूरम्। केदारम्। उदरम्। अजस्रम्। शरीरम् कन्दरम्। मन्दारम्। पंजरम्। अजरम्। जठरम्। अजिरम्। वैरम्। चामरम्। पुष्करम्। गह्वरम्। कुहरम्। कुटीरम्। कुलीरम्। चत्वरम्। काश्मीरम्। नीरम्। अम्बरम्। शिशिरम्। तन्त्रम्। यन्त्रम्। क्षत्रम्। क्षेत्रम्। मित्रम्। कलत्रम्। चित्रम्। मूत्रम्। सूत्रम्। वक्त्रम्। नेत्रम्। गोत्रम्। अंगुलित्रम्। भलत्रम्। शस्त्रम्। शास्त्रम्। वस्त्रम्। पत्रम्। पात्रम्। छत्रम् ॥

द्वारम्=निर्गमनम्, प्रतीहारः। अग्रम्=पुरस्तात्। स्फारम्=वृद्धम् विस्तृतं वा। तक्रम्=उदश्वित्। वक्रम्=कुटिलम्। वप्रम्=मृत्तिकास्तूपः। क्षिप्रम्=शीघ्रम्। क्षुद्रम्=तुच्छम्। नीरम्=जलम्। तीरम्=तटम्। दूरम्=विप्रकृष्टम्। कृच्छ्रम्=दुःखम्। रन्ध्रम्=

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

छिद्रम् । अश्रम्=नेत्रजलम् । श्वभ्रम्=छिद्रम् । भीरम्=भीरुः । गभीरम्=गम्भीरम् । क्रूरम्=निर्दयम् । विचित्रम्=अद्भुतम् । केयूरम्=बाहुभूषणम् । केदारम्=क्षेत्रम् । उदरम्=कुक्षिः । अजस्रम्=निरन्तरम् । शरीरम्=गात्रम् । कन्दरम्=आर्द्रकम् । मन्दारम्=देवतरुपुष्पम् । पंजरम्=कङ्कालम् । अजरम्=जरारहितम् । जठरम्=उदरम् । अजिरम्=चत्वरम् (आंगन) । वैरम्=शत्रुता । चामरम्=चमरीलोमजं व्यजनम् । पुष्करम्=व्योम, पद्मम् । गह्वरम्=कुहरम् । कुहरम्=गह्वरम्, छिद्रम् । कुटीरम्=कुटिया इति भाषा । कुलीरम् कर्कट, (केकड़ा) । चत्वरम्=स्थण्डिलम् । काश्मीरम्=केसर इति भाषा । नीरम्=जलम् । अम्बरम्=वस्त्रम् । शिशिरम्=ऋतुविशेषः (माघ-फाल्गुनौ) । तन्त्रम्=तन्तुः । यन्त्रम्=मशीन इति भाषा । क्षत्रम्=क्षत्रियकुलम् । क्षेत्रम्=केदारम् । मित्रम्=सुहृत् । कलत्रम्=भार्या । चित्रम्=आलेख्यम् । मूत्रम्=मूत इति भाषा । सूत्रम्=तन्तुः । वक्त्रम=मुखम् । नेत्रम्=चक्षुः । गोत्रम्=कुलम् । अंगुलित्रम्=दस्ताना इति भाषा । शस्त्रम्=आयुधम् । शास्त्रम्=ग्रन्थः । वस्त्रम्=वसनम् । पत्रम्=दलम् । पात्रम्=भाण्डम् । छत्रम्=आतपत्रम् ।

९१–शुक्रमदेवतायाम् ॥ ५७ ॥

शुक्रम् १।१ अदेवतायाम् ७।१ ॥ न देवता अदेवता, तस्यामदेवतायाम् । नपुंसके इत्यनुवर्त्तते । अदेवतावाची शुक्रशब्दो नपुंसके भवति । रोपधत्वात् पुंस्त्वे प्राप्ते नपुंसकत्वं विधीयते । इदं शुक्रम् । रेत इत्यर्थः ॥

९२–चक्रवज्रान्धकारसारावारपारक्षीरतोमरशृङ्गारभृङ्गारमन्दारोशीरतिमिरशिशिराणि नपुंसके च ॥ ५८ ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चक्र-वज्र-अन्धकार-सार--अवार--पार--क्षीर-तोमर--शृङ्गार-भृङ्गार-मन्दार-उशीर--तिमिर-शिशिराणि १।३ नपुंसके ७।१ च अ०प० ॥ चक्र-वज्र-अन्धकार-सार-अवार-पार-क्षीर-तोमर-शृङ्गार-भृङ्गार-मन्दार-उशीर-तिमिर-शिशिराणि एते चतुर्दश शब्दाः पुंसि नपुंसके च भवन्ति । रोपधत्वात्पूर्वेण पुंसत्वे प्राप्ते पक्षे नपुंसकार्थं वचनम् । चक्रः, चक्रम् । वज्रः, वज्रम् । अन्धकारः, अन्धकारम् । सारः, सारम् । अवारः, अवारम् । पारः, पारम् क्षीरः, क्षीरम् । तोमरः, तोमरम् । शृङ्गारः, शृङ्गारम् । भृङ्गारः, भृङ्गारम् । मन्दारः, मन्दारम् । उशीरः, उशीरम् । तिमिरः, तिमिरम् । शिशिरः, शिशिरम् ।

चक्रः=चक्रवाक पक्षी, रथाङ्ग वा पहिया इति भाषा । वज्रः=कुलिशम् । अन्धकारः=तिमिरम् । सारः=मज्जा, घनं वा । अवारः=नदीतटम् । पारः=परवर्ति नदीतटम् । क्षीरः=दुग्धम् । तोमरः=लोहदण्डः बर्छी इति भाषा । शृङ्गारः=स्त्रीपुंसयोः स्पृहा । भृङ्गारः=गडुकः जलपात्रम् । मन्दारः=देवतरुः । उशीरः=वीरण-मूलम् । तिमिरः=अन्धकारः शिशिरः ऋतुविशेषः ॥

९३—षोपधः ॥ ५९ ॥

षोपधः १।१ षकार उपधायां यस्य स षोपधः षकारोपधोऽका-रान्तः शब्दः पुंसि भवति । अयं वृषः । अयं वृक्ष इत्यादि ॥

९४—शिरीषर्जीषाम्बरीषपीयूषपुरीषकिल्विषकल्माषाणि नपुंसके ॥ ६० ॥

शिरीष-ऋजीष-अम्बरीष-पीयूष-पुरीष--किल्विष--कल्माषाणि १।३ नपुंसके ७।१ ॥ शिरीष-ऋजीष-अम्बरीष-पीयूष-पुरीष-किल्विष-कल्माषाणि एते सप्त शब्दा नपुंसके भवन्ति । षोपधत्वात्पूर्वेण पुंस्त्वे प्राप्ते नपुंसकत्वं विधीयते । इदं शिरीषम् । इदमृजीषम् । इदमम्बरीषम् । इदं पीयूषम् । इदं पुरीषम् । इदं किल्विषम् । इदं कल्माषम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिरीषम्=वृक्षविशेषः। ऋजीषम्=सोमरसम् अम्बरीषम्=कड़ाही इति भाषा । पीयूषम्=अमृतम् । पुरीषम्=मलम् । किल्विषम्=पापम् । कल्माषम्=पापम् ॥

९५—यूषकरीषमिषविषवर्षाणि नपुंसके च ॥ ६१ ॥

यूष-करीष-मिष-विष-वर्षाणि १।३ नपुंसके ७।१ च अ० प० ॥ यूष–करीष–मिष–विष–वर्षाणि एते पंच शब्दाः पुंसि नपुंसके च भवन्ति। षोपधत्वात् पूर्वेण पुंस्त्वे प्राप्ते पक्षे नपुंसकार्थं वचनम्। यूषः, यूषम्। करीषः, करीषम्। मिषः मिषम्। विषः, विषम्। वर्षः, वर्षम् ॥

यूषम्=शोरवा इति भाषा। करीषम्=शुष्कगोमयम्, करस इति भाषा। मिषम्=छलम्। विषम्=गरलम। वर्षम्=वर्षाः, संवत्सरो वा ॥

९६—सोपधः ॥ ६२ ॥

सोपधः १।१ ॥ सकार उपधायां यस्य स सोपधः । सोपधोऽकारान्तः शब्दः पुंसि भवति। अयं वत्सः। अयं वायसः । अयं महानसः इत्यादि ॥

९७—पनसबिसबुससाहसानि नपुंसके ॥ ६३ ॥

पनस-बिस-बुस-साहसानि १।३ नपुंसके ७।१. पनस–बिस–बुस साहसानि एते चत्वारः शब्दाः नपुंसके भवन्ति। सोपधत्वात्पुंस्त्वे प्राप्ते नपुंसकत्वं विधीयते। इदं पनसम्। इदं बिसम्। इदं बुसम्। इदं साहसम् ॥

पनसम्=कटहल वृक्षविशेषः, तस्य फलम्। बिसम्=कमलनालतन्तुः। बुसम्=भूसा इति भाषा। साहसम्=मनोबलम् ॥

९८—चमसांसरसनिर्यासोपवासकार्पासवासभासकासकांसमांसानि नपुंसके च ॥ ६४ ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चमस-अंस-रस-निर्यास-उपवास-कार्पास-वास-भास-कास-कांस-मांसानि १।३ नपुंसके ७।१ च अ० प०॥ चमस-अंस-रस-निर्यास-उपवास-कार्पास-वास-भास-कास-कांस-मांसानि एत एकादश शब्दाः पुंसि नपुंसके च भवन्ति। सोपधत्वात्पुंस्त्वे प्राप्ते पक्षे नपुंसकार्थं वचनम्। चमसः, चमसम्। अंसः, अंसम्। रसः, रसम्। निर्यासः, निर्यासम्। उपवासः, उपवासम्। कार्पासः, कार्पासम्। वासः, वासम्। भासः, भासम्। कासः, कासम्। कांसः, कांसम्। मांसः, मांसम्॥

चमसः=चमचा इति भाषा। अंसः=स्कन्धः। रसः=सारः। निर्यासः=वृक्षादिक्षीरम् गोन्द इति भाषा उपवासः=व्रतम्। कार्पासः=कृपास इति भाषा। वासः=वस्त्रम्। भासः=दीप्तिः। कासः=खांसी इति भाषा। कांसः=कांसी इति भाषा। मांसः=पललम्॥

९९-कंसं चाऽप्राणिनि॥ ६५॥

कंसम् १।१ च अ० प० अप्राणिनि ७।१॥ अप्राणिनि वाच्ये कंसशब्दः पुंसि नपुंसके च भवति। अयं कंसः। इदं कंसम्। पान-भाजनमित्यर्थः। गिलास इति भाषायाम्। प्राणिनि वाच्ये तु पुंस्येव भवति—कंसो नाम राजा। अत्र चकारोऽकारान्ताधिकारनिवृत्त्यर्थः॥

१००-रश्मिदिवसाभिधानानि॥ ६६॥

रश्मि-दिवसाभिधानानि १।३॥ रश्मिवाचका दिवसवाचकाश्च शब्दाः पुंसि भवन्ति। रश्मिवाचकाः—अयं रश्मिः। अयं मयूखः। अयं किरणः। दिवसवाचकाः—अयं दिवसः। अयं घस्रः॥

१०१-दीधितिः स्त्रियाम्॥ ६७॥

दीधितिः १।१ स्त्रियाम् ७।१॥ रश्मिवाचको दीधितिः शब्दः स्त्रियां भवति। रश्मिवाचित्वात्पूर्वेण पुंस्त्वे प्राप्ते स्त्रीत्वं विधीयते।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इयं दीधितिः । दीधितिः=रश्मिः ॥

१०२–दिनाहनी नपुंसके ॥ ६८ ॥

दिन-अहनी १।२ नपुंसके ७।१॥ दिनं च अहश्च ते दिनाहनी । दिवसवाचकौ दिनाहनी शब्दौ नपुंसके भवतः । दिवसाभिधानत्वात् पूर्वेण पुंस्त्वे प्राप्ते नपुंसकत्वं विधीयते । इदं दिनम् । इदमहः ॥

दिनम्=दिवसः । अहः=दिवसः ।

१०३–मानाभिधानानि ॥ ६९ ॥

मान-अभिधानानि १।३॥ मीयतेऽनेनेति मानम् । परिमाणमित्यर्थः । मानाभिधानानि=परिमाणवाचकाः शब्दाः पुंसि भवन्ति । अयं कुडवः । अयं प्रस्थः ॥

कुडवः = परिमाणविशेषः (१२ अंजलयः) । प्रस्थः=परिमाणविशेषः (३२ पलम्) ।

१०४–द्रोणाढकौ नपुंसके च । ७० ॥

द्रोण-आढकौ १।२ नपुंसके ७।१ च अ० प० ॥ परिमाणवाचकौ द्रोण-आढकौ शब्दौ पुंसि नपुंसके च भवतः । मानाभिधानत्वात्पुंस्त्वे प्राप्ते पक्षे नपुंसकार्थं वचनम् । अयं द्रोणः । इदं द्रोणम् । अयमाढकः । इदमाढकम् ॥

द्रोणः=आढकचतुष्टयम् (१६ सेर) । आढकम्=द्रोणचतुर्थांशः

१०५–खारीमानिके स्त्रियाम् ॥ ७१ ॥

खारी-मानिके १।२ स्त्रियाम् ७।१॥ खारी च मानिका ते खारीमानिके । परिमाणवाचकौ खारीमानिके शब्दौ स्त्रियां भवतः । मानाभिधानत्वात्पुंस्त्वे प्राप्ते स्त्रीत्वं विधीयते । इयं खारी । इयं मानिका ॥

खारी=परिमाणविशेषः (१२ मन ३२ सेर) । मानिका=परिमाणविशेषः (८ पलम्) ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१०६–दाराऽक्षतलाजानां बहुत्वं च ।। ७२ ।।

दारा-अक्षत-लाजानाम् ६।३ बहुत्वम् १।१ च अ० प० ।। दारा-अक्षत-लाजाः शब्दाः पुंसि बहुवचने च भवन्ति। इमे दाराः। इमेऽक्षताः। इमे लाजाः। एते शब्दाः पुंसि नित्यबहुवचनान्ताश्च ।।

दाराः=स्त्री। अक्षताः=कुमारी। लाजाः=भृष्टधान्यम् खील इति भाषा।

१०७–नाड्यपजनोपपदानि व्रणाङ्गपदानि । ७३।।

नाडी-अप-जनोपपदानि १।३ व्रण-अङ्ग-पदानि १।३।। नाडीपूर्वो व्रणशब्दः, अपपूर्वोऽङ्गशब्दः, जनपूर्वः पदशब्दश्च पुंसि भवति। अयं नाडीव्रणः। अयमपाङ्गः। अयं जनपदः। व्रणादीनां पुंस्त्वं नपुंसकत्वं च। तेन परवल्लिङ्गतयोभयलिङ्गत्वे प्राप्ते नित्यपुंस्त्वार्थं वचनम् ।।

नाडीव्रणः=नाडीघातः। अपाङ्ग=चक्षुष्कोणः। जनपदः=राष्ट्रम्।

१०८–मरुद्गरुदुत्तरदृत्विजः ।। ७४ ।।

मरुत्–गरुत्–उत्तरत्–ऋत्विजः १।३।। मरुत्–गरुत्–उत्तरत्–ऋत्विज एते चत्वारः शब्दाः पुंसि भवन्ति। अयं मरुत्। अयं गरुत्। अयमुत्तरत्। अयमृत्विक्।

मरुत्=वायुः। गरुत्=पंख इति भाषा ऋत्विक्=याजकः।

१०९–ऋषिराशिदृतिग्रन्थिक्रिमिध्वनिबलिकौलिमौलिरविकविकपिमुनयः ।। ७५ ।।

ऋषि-राशि-दृति-ग्रन्थि-क्रिमि-ध्वनि-बलि-कौलि-मौलि-रवि-कवि-कपि-मुनयः १।३ ।। ऋषि-राशि-दृति-ग्रन्थि-क्रिमि-ध्वनि-बलि-कौलि-मौलि-रवि-कवि-मुनय एते त्रयोदश शब्दाः पुंसि भवन्ति।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयमृषिः । अयं राशिः । अयं दृतिः । अयं ग्रन्थिः । अयं क्रिमिः । अयं ध्वनिः । अयं बलिः । अयं कौलिः । अयं मौलिः । अयं रविः । अयं कविः । अयं कपिः । अयं मुनिः ॥

ऋषिः=साक्षात्कृतधर्मा । राशिः=धान्यादिसमूहः । दृतिः=मसक इति भाषा । ग्रन्थिः=बन्धनम् । क्रिमिः=जन्तुः । ध्वनिः=शब्दः । वलिः=उपहारः । मौलिः=शिरः । रविः=सूर्यः । कविः=क्रान्तदर्शी । कपिः=वानरः । मुनिः=स्थितधीः ॥

११०–ध्वजगजमुञ्जपुञ्जाः ७६ ॥

ध्वज–गज-मुञ्ज–पुञ्जाः १।३ ॥ ध्वज–गज–मुञ्ज-पुञ्जा एते चत्वारः पुंसि भवन्ति । अयं ध्वजः । अयं गजः । अयं मुञ्जः । अयं पुञ्जः ॥

ध्वजः=पताका । गजः=करी । मुञ्जः=मूंज इति भाषा । पुञ्जः=समूहः ।

१११–हस्तकुन्तान्तवातव्रातदूतधूर्तसूतचूतमुहूर्त्ताः ॥ ७७ ॥

हस्त-कुन्त-अन्त-वात-व्रात-दूत-धूर्त-सूत–चूत--मुहूर्ता एते दश शब्दाः पुंसि भवन्ति । अयं हस्तः । अयं कुन्तः । अयमन्तः । अयं वातः । अयं व्रातः । अयं दूतः । अयं धूर्तः । अयं सूतः । अयं चूतः । अयं मुहूर्तः ॥

हस्तः=करः । कुन्तः=भाला इति भाषा । अन्तः=समाप्तिः । वातः=वायुः । व्रातः=नीचजातिः, समूहः । दूतः=सन्देशवाहकः । धूर्तः=शठः । सूतः=सारथिः । चूतः=आम्रवृक्षः । मुहूर्तः=कालभेदः (४८ मिनट) ॥

११२–षण्डमण्डकरण्डभरण्डवरण्डतुण्डगण्डमुण्डपाषण्ड-शिखण्डाः ॥ ७८ ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

षण्ड--मण्ड--करण्ड--भरण्ड--वरण्ड--तुण्ड-गण्ड--मुण्ड--पाषण्ड-शिखण्डा एते दश शब्दाः पुंसि भवन्ति । अयं षण्डः । अयं मण्डः । अयं करण्डः । अयं भरण्डः । अयं वरण्डः । अयं तुण्डः । अयं गण्डः । अयं मुण्डः । अयं पाषण्डः । अयं शिखण्डः ॥

षण्डः=नपुंसकः । मण्डः=मलाई इति भाषा । करण्डः=पिटारी इति भाषा । भरण्डः=स्वामी । वरण्डः=मुखरोगः । तुण्डः=मुखम् । गण्डः=गाल इति भाषा । मुण्डः=शिरः । पाषण्डः=वेद-विरुद्धाचरणम् । शिखण्डः=शिखा ॥

११३–वंशांशपुरोडाशाः ॥ ७९ ॥

वंश-अंश-पुरोडाशाः १।३ ॥ वंश-अंश-पुरोडाशा एते त्रयः शब्दाः पुंसि भवन्ति । अयं वंशः । अयमंशः । अयं पुरोडाशः ॥

वंश=कुलम् । अंश=भागः । पुरोडाशः=कपाल में पकी चावल के आटे की टिकिया ।

११४–ह्रदकन्दकुन्दबुद्बुदशब्दाः ॥ ८० ॥

ह्रद-कन्द-कुन्द-बुद्बुद-शब्दाः १।३ ॥ ह्रद-कन्द–कुन्द-बुद्बुद-शब्दा एते पंच शब्दाः पुंसि भवन्ति । अयं ह्रदः । अयं कन्दः । अयं कुन्दः । अयं बुद्बुदः । अयं शब्दः ॥

ह्रदः=जलाशयः । कन्दः=सस्यमूलम् । कुन्दः=चमेली इति भाषा । बुद्बुदः=बुलबुला इति भाषा । शब्दः=ध्वनिः ।

११५–अर्घपथिमथ्यृभुक्षिस्तम्बनितम्बपूगाः । ८१ ।

अर्घ-पथि-मथि-ऋभुक्षि-स्तम्ब-नितम्ब-पूगाः १।३ । अर्घ-पथि-मथि-ऋभुक्षि-स्तम्ब-नितम्ब-पूगा एते सप्त शब्दाः पुंसि भवन्ति । अयमर्घः । अयं पन्थाः । अयं मन्थाः । अयमृभुक्षाः । अयं स्तम्बः । अयं नितम्बः । अयं पूगः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्घः=पूजा। पन्थाः=मार्गः। मन्थाः=मन्थानदण्डः रई इति भाषा। स्तम्बः=खंभा इति भाषा। नितम्बः=कटकः। पूगः=समूहः।

११६—पल्लवपल्वलकफरेफकटाहनिर्व्यूहमठमणितरङ्ग-तुरङ्गगन्धस्कन्धमृदङ्गसङ्गसमुद्गपुङ्खाः ॥ ८२ ॥

पल्लव-पल्वल-कफ--रेफ-कटाह -निर्व्यूह-मठ-मणि-तरङ्ग-तुरङ्ग-गन्ध-स्कन्ध-मृदङ्ग-सङ्ग-समुद्ग-पुङ्खाः १।३ ॥ पल्लव-पल्वल-कफ-रेफ-कटाह--निर्व्यूह-मठ--मणि--तरङ्ग--तुरङ्ग-गन्ध--स्कन्ध--मृदङ्ग--सङ्ग-समुद्ग--पुङ्खा एते षोडश शब्दाः पुंसि भवन्ति। अयं पल्लवः। अयं पल्वलः। अयं कफः। अय रेफः। अयं कटाहः। अयं निर्व्यूहः। अयं मठः। अयं मणिः। अयं तरङ्गः। अयं तुरङ्गः। अयं गन्धः। अयं स्कन्धः। अयं मृदङ्गः। अयं सङ्गः। अयं समुद्गः। अयं पुङ्खः।

पल्लवः=किसलयम्। पल्वलः=सरोवरः। कफः=श्लेष्मा। रेफः=अधमः। कटाहः=कड़ाही इति भाषा। मठः=छात्रावासः। मणिः=रत्नम्। तरङ्गः=ऊर्मिः। तुरङ्गः=अश्वः। गन्धः=सौरभम्। स्कन्धः=अंसः। मृदङ्गः=वाद्यविशेषः, मुरजः। सङ्गः=संयोगः। समुद्गः=टोकरी इति भाषा। पुङ्खः=शरपुच्छं श्येनो वा।

११७—सारथ्यतिथिकुक्षिबस्तिपाण्यञ्जलयः ॥ ८३ ॥

सारथि-अतिथि-कुक्षि-वस्ति-पाणि-अञ्जलयः १।३॥ सारथि-अतिथि-कुक्षि-बस्ति-पाणि-अञ्जलय एते षट् शब्दाः पुंसि भवन्ति। अयं सारथिः। अयमतिथिः। अयं कुक्षिः। अयं वस्तिः। अयं पाणिः। अयमञ्जलिः॥

सारथिः=सूतः। अतिथिः=अभ्यागतः। कुक्षिः=उदरम्। वस्तिः=मूत्राशयः। पाणिः=करः।

इति पुंल्लिङ्गप्रकरणम्॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ नपुंसक--प्रकरणम्

११८–नपुंसकम् ॥ १ ॥

नपुंसकम् १।१॥ नपुंसकमित्यधिकारोऽयम् ॥

११९–भावे ल्युडन्तः ॥ २ ॥

भावे ७।१ ल्युट्-अन्तः १।१॥ भावे ल्युट् प्रत्ययान्तः शब्दो नपुंसके भवति। हसनम्। गमनम्। इत्यादि। भाव इति किम्? पच्यतेऽनेनेति पचनोऽग्निः। इध्मप्रव्रश्चनः कुठारः, पाषाणदारणो टङ्कः, इत्यत्र करणे ल्युट् न भावे।

१२०–निष्ठा च ॥ ३ ॥

निष्ठा १।१ च अ० प० ॥ भाव इत्यनुवर्त्तते, भावे निष्ठा-प्रत्ययान्तः शब्दो नपुंसके भवति। हसितम्। गीतमित्यादि ॥

१२१–त्वष्यञौ तद्धितौ ॥ ४ ॥

त्व-ष्यञौ १।२ तद्धितौ १।२॥ भाव इत्यनुवर्त्तते। भावेऽर्थे तद्धितत्वप्रत्ययान्तस्तद्धितष्यञ्प्रत्ययान्तश्च शब्दो नपुंसके भवति। त्व-शुक्लत्वम्, ष्यञ्-शौक्ल्यम्। ष्यञ्-प्रत्ययस्य षित्त्वात् पक्षे स्त्रीत्व-मपि बोध्यम्। तेन षिद्गौरादिभ्यश्चेति ङीप्-प्रत्यये यलोपे सति चातुर्यम्, चातुरी (स्त्री०)। सामग्र्यम्, सामग्री (स्त्री०)। औचि-त्यम्, औचिती (स्त्री०) ॥

१२२–कर्मणि च ब्राह्मणादिगुणवचनेभ्यः ॥ ५ ॥

कर्मणि ७।१ च अ० प० ब्राह्मणादि-गुण-वचनेभ्यः ५।३॥ कर्मणि भावे चार्थे ब्राह्मणादिभ्यो गुणवचनेभ्यश्च शब्देभ्यो यौ त्वष्यञौ तद्धितौ विहितौ, तदन्ताः शब्दा नपुंसके भवन्ति। ब्राह्मणादिभ्यः- ब्राह्मणस्य कर्म भावो वा ब्राह्मणत्वम्, ब्राह्मण्यम्।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

माणवत्वम्, माणव्यम्। गुणवचनेभ्यः—जडस्य कर्म भावो वा जडत्वम्, जाड्यम्॥

१२३—यद्यढग्यगञण्वुञ्छाश्च भावकर्मणि॥६।

यत्-य-ढक्-यक्-अञ्-अण्-वुञ्-छाः १।३ च अ० प० भावकर्मणि ७ १॥ भावे कर्मणि चार्थे ये तद्धिता यत्-य-ढक्-यक्-अञ्-अण्-वुञ्-छाः प्रत्ययास्तदन्ताः शब्दा नपुंसके भवन्ति। यत् स्तेनस्य भावः कर्म वा स्तेयम्। स्तेनाद्यन्नलोपश्च (५।१।१२५) इति यत्-प्रत्ययः। स्तेन+यत्+सु=स्तेयम्। य—सख्युर्भावः कर्म वा सख्यम्। सख्युर्यः (५।१।१२६) इति य-प्रत्ययः। सखि+य+सु=सख्यम्। ढक्-कपेर्भावः कर्म वा कापेयम्। ज्ञातेर्भावः कर्म वा ज्ञातेयम्। कपिज्ञात्योर्ढक् (५।१।१२७) इति ढक्-प्रत्ययः। कपि+ढक्+सु। काप्+एय+सु=कापेयम्। एवं ज्ञातेयम्॥ यक्-अधिपतेर्भावः कर्म वा आधिपत्यम्। पुरोहितस्य भावः कर्म वा पौरोहित्यम्। पत्यन्तपुरोहितादिभ्यो यक् (५।१।१२८) इति यक्-प्रत्ययः। अधिपति+यक्+सु=आधिपत्यम्। पुरोहित+यक्+सु=पौरोहित्यम्। अञ्-उष्ट्रस्य भावः कर्म वा औष्ट्रम्। कुमारस्य भावः कर्म वा कौमारम्। इत्यादि। प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् (५।१।१२९) इत्यञ्-प्रत्ययः। उष्ट्र+अञ्+सु=औष्ट्रम्। कुमार+अञ्+सु=कौमारम्। अण्-द्विहायनस्य भावः कर्म वा द्वैहायनम्। यूनो भावः कर्म वा यौवनम्। हायनान्तयुवादिभ्योऽण् (५।१।१३०) इत्यण् प्रत्ययः। द्विहायन+अण्+सु=द्वैहायनम्। युवन्+अण्+सु=यौवनम्। वुञ्—पितापुत्रयोर्भावः कर्म वा पितापुत्रकम्। मनोज्ञस्य भावः कर्म वा मानोज्ञकम्। द्वन्द्वमनोज्ञादिभ्यो वुञ् (५।१।१३३) इति वुञ्-प्रत्ययः। पितापुत्र+वुञ्+सु=पितापुत्रकम्। मनोज्ञ+वुञ्+सु=मानोज्ञकम्। छ-अच्छावाकस्य भावः कर्म वा अच्छावाकीयम्। होत्राभ्यश्छः (५।१।१३५) इति छ-प्रत्ययः। अच्छावाक-छ+सु।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छावाक-ईय+सु=अच्छावाकीयम् ।

१२४—अव्ययीभावः ॥ ७ ॥

अव्ययीभावः १।१॥ अव्ययीभावसमासो नपुंसकलिङ्गो भवति। अधिकुमारि। अधिस्त्रि। अधिकुमारि इत्यादौ 'अव्ययं विभक्ति-समीप०' इत्यव्ययीभावः। कुमारिष्वधिकृत्य या कथा प्रवर्त्तते तत् अधिकुमारि। एवमधिस्त्रि। अव्ययीभावत्वात् प्रकृतयोगेन नपुंसकत्वे 'ह्रस्वो नपुंसके प्रातिपदिकस्य' (१।२।४७) इति ह्रस्वत्वम्। स्वमोर्न-पुंसकात् (७।१।२३) इति सोर्लुक्। अष्टाध्यायीद्वितीयाध्यायस्य प्रथमपादस्य प्रारम्भे प्रतिपादितं सर्वमव्ययीभावसमासप्रकरणं द्रष्टव्यम् ॥

१२५—द्वन्द्वैकत्वम् ॥ ८ ॥

द्वन्द्व-एकत्वम् १।१॥ अष्टाध्यायीद्वितीयाध्यायस्य चतुर्थपादस्य प्रारम्भे 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' (२।४।२) इत्यादिना द्वन्द्व-समासस्यैकवचनत्वं प्रतिपादितम्। तद् द्वन्द्वैकत्वं नपुंसके भवति। पाणी च पादौ चेति पाणिपादम्। शिरोग्रीवम्। मार्दङ्गिकपाण-विकम्। रथिकपादातम्। इत्यादि ॥

१२६—अभाषायां हेमन्तशिशिरावहोरात्रे च ॥ ९ ॥

अभाषायाम् ७।१ हेमन्तशिशिरौ १।२ अहोरात्रे १।२ च अ० प० ॥ अभाषायाम्=छन्दसि हेमन्तशिशिरयोरहोरात्रयोश्च द्वन्द्वः पूर्ववल्लिङ्गो भवति। हेमन्तश्च शिशिरश्च तौ हेमन्तशिशिरौ। अहश्च रात्रिश्च ते अहोरात्रे ॥ हेमन्तशिशिरावहोरात्रे च छन्दसि (२।४।२८) इति पूर्ववल्लिङ्गता ॥

अनञ्कर्मधारयस्तत्पुरुषः ॥ १० ॥

अनञ्-कर्मधारयः १।१ तत्पुरुषः १।१॥ नञ्भिन्नः कर्मधारय-भिन्नश्च तत्पुरुषो नपुंसके भवतीत्यधिकारोऽयम्।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१२७—अनल्पे छाया ॥ १२ ॥

अनल्पे ७।१ छाया १।१॥ न अल्पमनल्पम्, तस्मिन्-अनल्पे। अनल्पे = बाहुल्ये गम्यमाने छायान्तस्तत्पुरुषो नपुंसके भवति। शराणां छायेति शरच्छायम्। इक्षूणां छायेति इक्षुच्छायम्॥

१२८—राजाऽमनुष्यपूर्वा सभा ॥ १३ ॥

राज-अमनुष्यपूर्वा १।१ सभा १।१॥ राजपूर्वोऽमनुष्यपूर्वश्च सभान्तस्तत्पुरुषो नपुंसके भवति। राजपूर्वः—इनसभम्। ईश्वरसभम्। राजपर्यायवचनस्यैव राजाद्यर्थमिति वचनात् राज्ञः पर्यायवाचका एव गृह्यन्ते। अमनुष्यपूर्वः—रक्षःसभम्। पिशाचसभम्। अमनुष्यशब्दो रक्षःपिशाचवचनः। राजामनुष्यपूर्वेति किम्? युवकसभा।

१२९—सुरासेनाच्छायाशालानिशाः स्त्रियां च ॥१४॥

सुरा-सेना-छाया-शाला-निशाः १।३ स्त्रियाम् ७।१ च अ० प०॥ सुरा, सेना छाया, शाला, निशा इत्येवमन्तस्तत्पुरुषो नपुंसके स्त्रियां च भवति। सुरा-यवसुरम्, यवसुरा। सेना-आर्यसेनम्, आर्यसेना। छाया वटच्छायम् वटच्छाया। शाला—गोशालम्, गोशाला। निशा—श्वनिशम्, श्वनिशा।

१३०—शिष्टं परवत्। १५ ॥

शिष्टम् १।१ परवत् अ० प० ॥ उक्तादन्यत् शिष्टम्। अन्यस्तत्पुरुषः परवल्लिङ्गो भवति। परस्य पदस्य यल्लिङ्गं तद् भवतीत्यर्थः। अर्द्धं पिप्पल्या इति अर्धपिप्पली। इत्यादि॥

१३१—रात्राह्नाहाः पुंसि ॥ १६ ॥

रात्र-अह्न-अहाः १।३ पुंसि ७।१॥ विहितसमासान्तनिर्देशः। रात्र, अह्न, अह इत्येते पुंसि भवन्ति। रात्र-द्विरात्रः, त्रिरात्रः। अह्न पूर्वाह्णः, अपराह्णः, मध्याह्नः। अह-द्व्यहः। त्र्यहः॥ परवल्लिङ्गतया पूर्वेण स्त्रीत्वे नपुंसकत्वे च प्राप्तेऽनेन पुंस्त्वं विधीयते।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१३२–अपथपुण्याहे नपुंसके ॥ १७ ॥

अपथ-पुण्याहे १।२ नपुंसके ७।१॥ अपथं च पुण्याहश्च ते अपथपुण्याहे। अपथ-पुण्याहशब्दौ नपुंसके भवतः। अपथमिदम्। अपथानि गाहते मूढः। पुण्याहमिदम्।

१३३–सङ्ख्यापूर्वा रात्रिः ॥ १८ ॥

सङ्ख्यापूर्वा १।१ रात्रिः १।१॥ सङ्ख्यापूर्वो रात्रिशब्दो नपुंसके भवति। त्रिरात्रम्। सङ्ख्यापूर्वेति किम्? सर्वरात्रः॥

१३४–द्विगुः स्त्रियां च व्यवस्थया ॥ १९ ॥

